विराजसरोजिनी

नाटिका

शब्दाचार्य्य-पुराणशास्त्रि-सांख्यरत्न-व्याकरणतीर्थ-काव्यतीर्थ-
स्मृतितीर्थोपाधिमता

श्रीहरिदास सिद्धान्तवागीशभट्टाचार्य्येण

प्रणीता

धार्म्मिकप्रवर-नकीपुराधीश्वरभूस्वामि-

श्रीलश्रीयुक्त राय हरिचरण चतुर्धुरीण-

राय वाहादुर महोदय प्रतिष्ठित चतुष्पाठीतः प्रकाशिता च ।

कलिकाता राजधान्यां,
८०।१ नं मुक्ताराम बाबु ष्ट्रीटस्थगोवर्द्धन यन्त्रे,
श्रीगोवर्द्धनपानेन मुद्रिता ।

१३१७ ।

विज्ञापनम् ।

—:o:—

१३१२ वङ्गाब्दे स्वनामधन्य-प्रातःस्मरणीय-स्वर्गीय-पार्व्वतीचरण-रायमहाशयस्य सहधर्म्मिणी धर्म्मप्राणा दीनदयावती मातृकल्पा योग्यताज्ञानवती श्रील-श्रीमती वगलासुन्दरी देवी स्वकीय-कविराजपुरनगरे महाभारतपाठे पाठकतायां 'महाननुग्रहोऽय'-मिति मन्यमानं मां न्ययुङ्क्त, मया सा कथमपि सम्पादिता च। आसीच्च एकस्मिन्नेव वृषसंक्रान्तिदिवसे तदीय सावित्री-व्रत-महाभारतयोरुद्यापनसम्भवः, तत्र च अशेषदिग्दिगन्ता-गतविचक्षणगणसभा भाविनीति मन्यमानेन अस्मदुपाध्यायेन महामहोपाध्यायकल्पेन नितान्तभक्तिभाजन-परमपूज्यपाद-श्रीयुक्त आनन्दचन्द्र विद्यारत्न महाशयेन, परमविद्योत्साहिना पण्डितप्रियेण सुपण्डितेन दाने पितृपदवीमधिरूढेन स्वर्गीय-पार्व्वतीचरण-प्रथमात्मजेन श्रीमता कृष्णदासरायमहाशयेन च अस्या एव "विराजसरोजिनी" नाटिकाया अभिनये समुत्-साहिता वयम्। सुसम्पन्नस्तायमभिनयः। अत्र च सहोदरप्रतिमाः श्रीयुक्त विनोदविहारि भट्टाचार्य्यप्रभृतयः सतीर्थाः, प्रियतमाः श्रीयुक्त हरेन्द्रनाथ व्याकरण काव्यतीर्थ प्रभृतयश्छात्राः, कुमारसुन्दराकृतिः सुकुमारमतिः पार्व्वतीचरण द्वितीयात्मजः श्रीमान् आशुतोष रायश्च अभिनयेऽस्मिन् स्वस्वभूमिकासु नितान्तनैपुण्यमदर्शयन्। आशेषाच्च अभिनयस्य सर्व्वेऽपि

शान्तिमन्त एवासनमध्यासीना आसन्। आसीच्च सभायां कथमपि मनोरथानुरूपा समालोचना, अभिनवसौष्ठवेन वा रचनापाटवेन वा सभासदामयं सन्तोष इति न कोऽपि निरणैषीत्। सेयमधुना विराजसरोजिनी प्रकाशीभवन्ती सर्व्वेषां लोचनगोचरतामापद्यते। इदानीम् एकोऽपि चेत् सानुग्रहदृष्ट्या परिग्रहेण खल्विमां कृतार्थयति, हन्त! तर्हि सफलो मे मदीयानयमायास इति।

विनीत—

श्रीहरिदास शर्म्मणः।

नाट्योल्लिखित व्यक्तिगण: ।

—:*:—

पुरुषगण: ।

सूत्रधार:	...	...	प्रस्तावसूचक: ।
राजा	...	...	मालवदेशाधीशो हरिदत्तनाम।
विदूषक:	...	...	अस्य सहाय: ।
वीरसिंह:	...	...	„ सेनापति: ।
सुबाहु:	...	...	दानव: ।
मान्तदेवोपाध्याय:	...	...	राजपण्डित: ।
श्रुतिनाथ:	...	...	अस्य छात्र: ।
बालक:	...	...	तथा ।
मङ्गलक:	...	...	द्वारिक: ।
देवराज:	...	...	तथा ।
पुरोहित:	...	...	गन्धर्वराजस्य ।

स्त्रीगण: ।

सरोजिनी	...	...	गन्धर्वराजकन्या ।
चित्रलेखा	...	...	अस्या: सखी ।
हेमप्रभा	...	...	„
देवी	...	...	राजमहिषी
मल्लिका	...	...	अस्या: परिचारिका ।
चम्पकिका	...	...	„

शुद्धिपत्रम् ।

अशुद्ध	शुद्ध	पृष्ठ	पंक्ति
अभिनव	अभिनय	१०	२
मह्हसाश्चणं	मह्हेसाश्चणं	६	११
लोत्त	लोओ	६	१४
तुव	तुए	१०	२
णिस्सिदा	णिम्मिदा	११	६
गणे	गले	१२	१३
असुनह्हो	असुलह्हो	१५	१२
तस्यैवावयो:	तथैवावयो:	१६	७
?	!	१६	८
मां	मं	१६	१५
सुमरविदह्मि	सुमराविदह्मि	२०	७
मनोभवतरलितया,	मनोभवतरलया	२१	१३
आणदो	आगदो	३०	६
पतिशोधं	प्रतिशोधं	३१	२१ (टीका)
जेण णिक्वामि	थाकिवे ना	३५।३६	१६।१
परिच्चतं	परिच्चत्तं	३६	२
ललताङ्गकान्ति'	ललिताङ्गकान्ति'	३६	१२
यं	यत्	४१	२१
मज्झत्थओणं	मज्झत्थत्तणं	४२	१४
परिच्चओं	परिच्चत्तं	४७	१४

अशुद्ध	शुद्ध	पृष्ठ	पंक्ति
तुव	तुए	४७	१४
धीरश्रोणं	धीरत्तणं	,,	,,
भूतो	भीतो	४८	१८
जगत्	जनः	५२	२
ज्यातिः	ज्योतिः	५२	१३
अउसनं	अउसलं	५३	४
अपराधिनि	अनपराधिनि	५७	१८
समुपस्तितेयं	समुपस्थितेयं	५८	१
दानिवराश्र !	दानवराश्र !	६३	६
निवत्तस्व	निवर्त्तस्व	६४	१८
कर्चो	कर्ची	६६	१८
कुक्कुराः	कुक्कुराः	६७	१७
हले	अले	७०	११
मूर्हद	सूर्हद	७४	१
नजन	नयन	७४	१५
मड़ सलोड़णोगुणि	मह्न सलोड़णोत्तणि	७६	६
छ	टु	७७	८
आदिविसदिसे	अदिविसदिसे	७८	८
सरोजिनो	न सरोजिनो	७८	२० (टीका)
सरल मृदु मृगान	सरल मृदु मृणाल	८१	४
अन्दा	अम्बा	८३	२
सस्य	अस्य	८८	२१
तादेन	नातिन	८८	१७

विराजसरोजिनी ।

प्रथमोऽङ्कः ।

य: सृष्टौ भवनामभाक्, पशुपतिस्त्राणे, हर: संहृतौ,
दैन्ये दिग्वसनो, महिम्नि गगनं विश्वेश्वर: सम्पदि ।
माङ्गल्ये च शिव:, समस्तविषयेष्वन्वर्थनामा, सदा
कल्याणं विदधातु व: स भगवान् योगीश्वर: शङ्कर: ॥ १ ॥

अपिच—

विरलविमलशोभां भालबालेन्दुलग्नां
द्रुततरमपहर्तुंस्तापयन् भालनेत्रात् ।
निजसिततनुकान्तौ यो विमिश्रीकरोति
स मनसि जगदीशो जागृयान्नित्यशो व: ॥ २ ॥

नान्द्यन्ते सूत्रधार: । अहो ! सानुनयमेव मानिनीमामन्त्रयामि ।
नेपथ्याभिमुखमवलोक्य । आर्य्ये ! परमकारुणिके ! परिसमाप्त एव ते वेशविन्यास:, तर्हि चिरयसि कथमत्रागन्तुम् ? ।

अथ प्रविशति नृत्यन्ती गायन्ती च नटी ।

दिने दिने चीयते मे मनोवेदना ।
रङ्गगृहे नटसि नट ! शून्यगृहे शयाना ।
नीलाकाशे विभाति शशी, पिक: कूजति दिशि दिशि

विमना: केन प्रिय ! दिवानिशि ?
वस गृहे वद चाटुमेषा मम कामना । *

सूत्र । आर्य्ये ! अमुना गानरागेण सभासदां खलु विकचीकृतमेव हृदयसरोजं, तदभिनयेन केनचित् सरसमपि क्रियताम् ।

नटी । अज्जउत्त ! कोण उण अहिणओ तुह्माणं अहिमदो ?(क)

सूत्र । आर्य्ये !

श्रीजानकीविक्रमनाटकात् परं
निर्म्माय काव्यञ्च "वियोगवैभवम्" ।
सृष्टा त्रयोविंशसमा वयस्विना
या नूतना श्रीहरिदासशर्म्मणा ॥ ३ ॥

तामेव वयमत्र विराजसरोजिनीं नाम नाटिकामभिनेतुमभिप्रेम: ।

नटी । णूदणत्ति मे वेवदि हिअअं । (ख)

सूत्र । आर्य्ये ! वचनमिदं ते न साधु मन्ये । यत:—

सुरीति: सरसा कान्ता सालङ्कारा च सद्गुणा ।
असेविता नवा वाणी वामा चातिमनोरमा ॥ ४ ॥

---

* "कार्य्यंतश्चोत्तमादीनां कार्य्यो भाषाविपर्य्ययः" इति साहित्यदर्पणात् बोधसुविधार्थं वर्त्तमानप्रथाख्या स्वरनिवेशार्थञ्च अत्र नाटिकायां गीतानि प्रायेण संस्कृतभाषयैव रचितानि ।

(क) आर्य्यपुत्र ! को नु पुनरभिनयो युष्माकमभिमत: ?

(ख) नूतनेति मे वेपते हृदयम् ।

नटी। एव्वं ण मए मन्दिदं, पुराणम्मि रूवअ कइणं अन्तमब्भे ण उबालहन्दि, विसेसदो णूदणं त्ति । (ग)

सूत्र। आर्य्ये ! विषयेऽस्मिन्नयमतीव सावधानः । यदुक्तममुनैव—

"खद्योतोऽपि तमोहारी पद्मश्च सवितुः सुहृत् ।
पुष्पञ्च यदि कामास्त्रं तदाहं न कविः कथम् ?" ॥ ५ ॥

परन्तु प्रशंसा वा निन्दा वा सुजनदुर्ज्जनतानुसारिणी । तथाच—

यां सज्जनः सुरचनां चिनुते प्रशंसन्
तामेव दुर्ज्जनगणो विजहाति निन्दन् ।
यत् सादरं पिबति यज्ञहविः सुरेन्द्रो
दूरात्तदेव विजहाति विरागतः श्वा ॥ ६ ॥

अहन्तु मन्ये, तरुणीव मनोहारिणी इयमपि नाटिका सभासदां हृदयग्राहिणी भाविनीति ।

नेपथ्ये। साधु नटनन्दन । साधु, समीचीनमिदं ते निदर्शनम् । तथाहि—

अतुलना ललनासु सरोजिनी
सहचरीधृतबाहुलता यदा ।
उपवने विचरन्त्यवलोकिता
तदवधीव चिरं हृदि चिन्तिता ॥ ७ ॥

(ग) एवं न मया भणितं, पुराणमपि रूपककविम् आत्मगर्व्वेण उपालभन्ते, विशेषतो नूतनमिति ।

सूत्र। आर्य्ये ! स्वरसंयोगादनुमीयते, हरिदश्वोऽयं पुनरपि सरोजिनीदर्शनलालसया इदमेव महेशमन्दिरमुपैति, तदमुष्य रहस्यस्थले नावयोर्युक्तमवस्थानम् ।

इति निष्क्रान्तौ।

प्रस्तावना ।

अथ प्रविशति सचिन्तो राजा विदूषकश्च।

राजा। साध्विन्यादि श्लोकान्तं पुनः पठित्वा। वयस्य ! नियतिरेवानुरागजननी जीवानाम् । यतः—

यां सर्व्वदोत्सुकमना: परिचिन्तयामि
सा मां विलोक्य मलिनाननतामुपैति ।
किं चन्द्रतां मयि, तथात्मनि पद्मिनीत्वं
नित्यं निवेदयति सा चतुरा स्वभावात् ॥ ८ ॥

विदू। वअस्स ! मा उत्तम्म, एव्व ज्जेव पच्चक्खं पलोएहि, सरलहिअआ सा कदि दिणाइं अणणुरत्ता चिट्ठिस्सदि ? । (घ)

राजा। सविषादमात्मगतम्। अयि हतहृदय ! किमेवमविषयमनुधावसि ? येन सा मामवलोक्यैव तदानीमधोमुखी जाता। अथवा कुतस्त्वामेवं ब्रवीमि ? लक्ष्यनिक्षिप्तो हि शरः न प्रायेण प्रतिनिवर्त्तते। भवतु तावत्। प्रकाशं। वयस्य ! आगच्छ, इदं प्राचीरान्तरालमेवालम्ब्य पुनरपि गन्धर्वराजनन्दिनीं प्रतिपालयामः । इति तथा कुरुतः ।

(घ) वयस्य ! मा उत्ताम्य, एवमेव प्रत्यक्षं प्रलोकय, सरलहृदया सा कति दिनानि अननुरक्ता स्थास्यति ? ।

ततः प्रविशन्ति मालाहस्ताः सरोजिनी, चित्रलेखा, वालिका हेमप्रभा च गायन्त्यः।

चन्द्रचूड़ ! शान्तिकर ! कुरु करुणाम्
मालती यूथी विकासिनी याति यातनाम्।
अतीतकलिकादशाम् उदिततरुणरसां
विनाऽलिमतिविरसां पश्य मलिनाम्।
शोषयति समीरणः, तापयति विरोचनः
दिवसे, निशि च पुनः याति मुद्रणाम्॥

राजा। अये ! लब्धं मयाश्वासस्थानम्।

विदू। किं त्ति ? (ङ)

राजा। पुनरपि दर्शनं सरोजिन्याः। अहो ! प्रथमावतीर्णयौवनानां हि कामिनीनां—

झनिति झनिति नादः सञ्चरन्नूपुरस्य
ललितचपलतायामीषदोषश्च लज्जा।
विविधनयनभङ्गी हेतुशून्यं स्मितञ्च
युवजनमदकार्य्यं मद्यभूतान्यमूनि॥ ८॥

शशधरकिरणे कोमलता, सुवर्णे च वर्णमाधुर्य्यं, न चानयोः कियानपि गन्धः, सहकारकुसुमे पुनरेकं सौरभमेवेति विलासिनां चिरन्तनो विषाद एष एकयैवानया परिहृतः।

तथाहि—

(ङ) किमिति ?।

सुवर्णवर्णः, शशिमूर्त्तिमार्दवं
विलासतैलैरतिचारुसौरभम्।
स्वर्णेऽस्ति मूल्यं, तदिह त्वमूल्यता
गीतिर्विशेषाऽस्त्यधिका ततोऽखिलात्॥ १०॥

अहो! तरुणीनां गानशक्तिर्नाम निखिलजनमोहनविद्या। तथाच—

वर्णैरेव तनुस्तनोति नितरामाकर्षणं नेत्रयो-
र्लीलालोलगतिर्विलुम्पति मतिं धैर्य्यक्षयं कुर्वती।
गीतंताललयाश्रितं सुललितं प्राक् चित्तमाकर्षति
मध्ये नन्दयते क्वचिद्व्यथयते सम्मोहयत्यन्तिमे॥ ११॥

चित्र। सहि! कधं तुए दिणे दिणे महेसाच्चणं लहू करीअदि जेण अज्जवि अप्पाइं ज्जेव विल्लवत्ताइं उवचिदाइं। (च)

सरो। हला चित्तलेहे! ऊसमेण मरुभूमीए रोविदं वि बीजं उब्बत्तिअ अवसरं गेह्णदि लोओ (छ)

चित्र। कुदो वा मालदीकुसुमसुउमारे तुह कलेवरे कढ़िणदा?। (ज)

(च) सखि! कथं त्वया दिने दिने महेशार्च्चनं लघूक्रियते? येन अद्यापि अल्पान्येव विल्वपत्राणि उपचितानि।

(छ) हला चित्रलेखे। ऊषरे मरुभूम्यां रोपितमपि वीजं उद्वर्त्य अवसरं गृह्णाति लोकः।

(ज) कुतो वा मालतीकुसुमसुकुमारे तव कलेवरे कठिनता?।

सखी । असदि रससेए कुदो मिदुलदा लदाए ? । (झ)

चित्र । मुहमण्डलञ्च सिसिरमथिदं विअ अरविन्दं मलिणदा मावहदि ? । (ञ)

सखी । दिणणाधदस्सणं विणा ण होदि अरविन्दस्स विआसो (ट)

चित्र । सस्मितं । सञ्चं तुए भणिदं । (ठ)

हेम । बहिणि ! ण किम्पि जाणामि तुह्माणं से आलावस्स । (ड)

चित्र । हेम प्रभायाश्चिबुकं गृहीत्वा । ललिदे ! जोव्वणं दाव आअच्छदु तदो जाणिस्ससि । (ढ)

हेम । णहि णहि, कधेहि । (ण)

चित्र । अहिमदभत्तिदस्सणं विणा मुहं से मलिणं जादंत्ति । (त) ।

हेम । भत्तुणा किं होदि ? । (थ)

(झ) भवति रससेके कुतो मृदुलता लतायाः ? ।

(ञ) मुखमण्डलञ्च शिशिरमथितमिवारविन्दं मलिनतामावहति ? ।

(ट) दिननाथदर्शनं विना न भवति अरविन्दस्य विकाशः ।

(ठ) सत्यं त्वया भणितम् ।

(ड) भगिनि ! न किमपि जानामि युवयोरस्य आलापस्य ।

(ढ) ललिते ! यौवनं तावदागच्छतु, ततो ज्ञास्यसि ।

(ण) नहि नहि, कथय ।

(त) अभिमतभर्तृदर्शनं विना मुखमस्या मलिनं जातमिति ।

(थ) भर्त्रा किं भवति ? ।

सरोजिनी चित्रलेखा च परस्परं मुखमवलोकयत:।

राजा। सविस्मयोल्लासं। वयस्य! आसां खलु विचित्रोऽयमालाप:। चित्रलेखामभिलक्ष्य। चित्रलेखे! बालिकां नाम हेमप्रभां शिक्षयितुं कथमीदृशं यतसे?। यत:—

उदयति रसिकत्वं यौवने कामिनीनां
सततमनपनेया मुग्धता शैशवे तु।
मधु भवति नलिन्या: पुष्पिताया: स्वभावात्
पतति तु कलिकाया न्यस्तमप्यात्मनैव॥ १२॥

विदू। भो तूह्णीं होहि दाव मज्झे जप्पन्तो रसभङ्गं करेसि। (द)

हेम। णं कधेहि, भत्तुणा किं होदि?। (ध)

चित्र। अदीक्खिदासि तुमं, ता एदं वेदवअणं ण शुणिदव्वं। (न)

सरोजिनी स्मितं करोति।

हेम। हला चदुरे! तुह्मे किं दीक्खिदे?। (प)

चित्र। दीक्खिदे ज्जेव। (फ)

हेम। केण?। (ब)

(द) भो: तूष्णीं भव तावत्, मध्ये जल्पन् रसभङ्गं करोषि।

(ध) ननु कथय, भर्त्रा किं भवति?।

(न) अदीक्षितासि त्वं तदेतत् वेदवचनं न श्रोतव्यम्।

(प) हला चतुरे! युवां किं दीक्षिते?।

(फ) दीक्षिते एव।

(ब) केन?।

चित्र । मदणाचज्जेण । (भ)

राजा । चित्रलेखे ! यदि च कथितमेवात्मनोर्दीक्षाग्रहणं, तर्हि खलु तस्येमं प्रकारमपि किं न कथयसि ? । यथा—

अविकलकलकण्ठः कोकिलस्तन्त्रधार-
श्चतुरगुरुरनङ्गः शिक्षिताशेषशिष्यः ।
रसवति कुचकुम्भे पूजयन्निष्टदेवं
समुपदिशति यूनामन्तरे मूलमन्त्रान् ॥ १३ ॥

विदू । मन्तसिद्धिं म्वि किं ण करेन्ति ? । (म)

राजा । सस्मितं । पुरश्चरणादृते कुतो मन्त्रसिद्धिः ? । सखे ! माधव !

इममेव युवा नवाङ्गना-
ललितालापरसं पिपासति ।
युवकात्मनि यस्य सन्निधौ
नव पीयूषरसोऽपि नीरसः ॥ १४ ॥

हेम । जइ वि तुह्मे दीक्खिदे, तहवि इत्थिओ ज्जेव, ता कधं वेदवअणं शुणुध भणध वा ? (य)

(भ) मदनाचार्य्येण ।

(म) । मन्त्रसिद्धिमपि किं न कुर्व्वन्ति ?

(य) । यद्यपि युवां दीक्षिते, तथापि स्त्रियावेव, तत्कथं वेदवचनं शृणुतो भणतो वा ? ।

चित्र। इत्थिआजणो वेदवअणं ण सुणेदि भणदि वा त्ति कहिं तुए जाणिदं ?। (र)

हेम। मह भादुणो अज्झअण समए उवज्झाअसआसादो। (ल)

चित्र। अम्मो! अहं पुरिसो ज्जेव। (व)

सरो। विहस्य मुखमवनमयति।

हेम। अधरं दर्शयति।

राजा। वयस्य! किमीदृशी युवतीनामालापपरम्परा भवता पूर्वमपि श्रुता ? तथाच—

निषिञ्चन्ती पूर्वं विरसहृदयं कौतुकरसै-
र्घनाकम्पे पश्चाद्वपुषि पुलकालिं विदधती।
तथा कर्षत्यन्से स्थिरयितुमलं क्लीश्च न यथा
विचित्रेयं काचिल्ललितललनालापलहरी ॥ १५ ॥

अपरञ्च प्रगल्भस्वभावा चित्रलेखा प्रकाशमेवालपति,— गभीरस्वभावा सरोजिनी तु इङ्गितैनैवालापमेनमनुमोदते।

पश्य—

स्मितयति श्रवणसमये कथयते पुनरधोमुखी च किञ्चित्।
लिखति नखेन मृत्तिकां लोलयति च लोचने क्वापि ॥ १६ ॥

सरोजिनीमवलोक्य सोल्लासं। माधव! पश्य पश्य

लावण्यैर्लुलिता शरीरलतिका कान्तिः स्मरक्लान्तिकृत्
हेमस्तम्भनिभोरुयुग्मकुचयोः किञ्चिद्विशेषान्विता।

(र)। स्त्रीजनो वेदवचनं न शृणोति भणति वा इति कस्मिन् त्वया ज्ञातम् ?।

(ल)। मम भ्रातुरध्ययनसमये उपाध्यायसकाशात्।

(व)। अहो! अहं पुरुष एव।

निर्गच्छत्यतिसूक्ष्मशुक्लवसनच्छिद्रान्तरालादियं-
मल्पाल्पाज्ज्वलतः प्रनष्टजलदात् ज्योत्स्नेव शीतद्युतेः ॥ १७ ॥

विदू । विविधभङ्ग्या विलोक्य । वअस्स ! एसा ण तुए अहिलसणिज्जा । (अ)

राजा । केन वयस्य !

विदू । जेण एसा विहिणा जादि चदुट्टएण णिम्मिदा । (ब)

राजा । केनैवं परिज्ञायते ? ।

विदू । णं पेक्ख, एसा क्खु सरे कोइला, गमणे राअहंसी, रूवे उव्वसी, वअसि सोड़सी त्ति । (स)

राजा । अये ! भवादृशैः खलु क्रियमाणा लोकोत्तरगुणशालिनामिह पदार्थानां प्रशंसा, निन्दायामिव परिणमते । तथाहि—

अल्पया नहि जनो निजशक्त्या
शक्तिमान् गणयितुं गुणराशिम् ।
अन्नपुञ्जमिव वालविड़ालः
किन्तु दूषयति तं मुखदानात् ॥ १८ ॥

(अ) वयस्य ! एषा न त्वया अभिलषणीया ।

(ब) येन एषा विधिना जातिचतुष्टयेन निर्म्मिता ।

(स) ननु प्रेक्षस्व, एषा खलु स्वरे कोकिला, गमने राजहंसी, रूपे उर्वशी, वयसि षोड़शीति ।

अहन्तु मन्ये

इन्दोः कान्तिं, हरिणनयनं, राजहंसस्य यानं
रम्भास्तम्भौ, मदनधनुषौ, कोकिलानां स्वरञ्च ।
आनीय प्रागविधिरभिमतान् स्रष्टुकामस्तु तांस्तान्
नारीरत्नं समसृजदिदं तत्परं कौतुकेन ॥ १८ ॥

अतएव 'उत्तमा' 'उपमा' 'साधारणी' चेत्यमी शब्दा नञ्-पूर्वका एवैनामभिदधतीति ।

सरो। हला चित्तलेहे! एहि, उवहारमालिश्रां महेसस्स अप्पेह्म। (ङ)

चित्र। सहि! तुह जीविदं महेसस्स ज्जेव मालिश्रां अप्पिश्र जास्सदि, ण क्खु तारिसं तरुणपुरिसं पाविहिसि त्ति तक्केमि जेण एरिसी दुल्लहलालसा। (च)

हेम। साक्रोशं। हला कुडिले! तुह गले किं ण अप्पेदि मालिश्रां? जेण तुए ज्जेव भणिदं, अहं पुरिसो ज्जेवत्ति (क)

सरोजिनीचित्रलेखे परस्परं मुखमवलोकयतः।

राजा। सोल्लासं। सखे! श्रुतोऽयमालापस्त्वया?।

(ङ) हला चित्रलेखे। एहि, उपहारमालिकां महेशस्य अर्पयामः।

(च) सखि! तव जीवितं महेशस्यैव मालिकामर्पयित्वा यास्यति, न खलु तादृशं तरुणपुरुषं प्राप्स्यसीति तर्कयामि, येन ईदृशी दुर्लभलालसा।

(क)। हला कुटिले! तव गले किं नार्पयति मालिकां? येन त्वयैव भणितम्, अहं पुरुष एवेति।

विदू। वअस्स जइ एदाणं एरिसो ज्जेव सङ्कप्पो, तदो अहं गदुअ कधेमि, तुह गले मालिआं अप्पेदुत्ति। (ख)

इति गन्तुमारभते।

राजा। विदूषकस्य पाणिमालम्ब्य।

दिवसो भविष्यति स मे कदा सखे!
प्रमदा यदेयमतिलोलपाणिना।
अवलोकमानजन-लोचनैः सह
स्रजमीदृशीं मम गले प्रदास्यति॥ २०॥

सखे! तमेवोपायमत्र चिन्तयामि येनाहममुष्या लोचन-गोचरीभवेयम्।

विदू। जं तक्केमि, मालिआदाणसमए इमेहिं गाइदव्वं, तत्थ तुमं वि किम्बि गाइस्ससि। (ग)

राजा। तर्हि सहसा प्रागदृष्टजनदर्शनोद्विग्ना यदीमाः पलायन्ते।

विदू। अहिलासो वट्टदि अमिअपाणे, केणअ पिवीअदि त्ति ण जाणासि, अह्मो! अअक्कान्त णिअड़ादो किं अन्तरा हुवितुं पारेदि लोहसलाआ? । (ग)

(ख) वयस्य! यदि एतासाम् ईदृशः सङ्कल्पः, ततः अहं गत्वा कथयामि, तव गले मालिकामर्पयतु इति।

(ग) यत् तर्कयामि, मालिकादानसमये आभिर्गातव्यं, तत्र त्वमपि किमपि गास्यसि।

(ग) अभिलाषो वर्त्तते अमृतपाने, केन च पीयत इति न जानासि, अहो! अयस्कान्तनिकटात् किम् अन्तरा भवितुं पारयति लौहशलाका?

राजा। एवमिदानीमस्मि सम्मतिमान्।

सरो। अनया मालया विनिमयेच्छया

शिव ! तव चरणमर्चये। इति शिवलिङ्गाय मालामर्पयति।

शिव। योगेश्वरस्त्वमेवासि किमिमां न योजयसि

योगहीन: किमिहासि तर्कये। तथा करोति।

हेम। सरोजिनीं हरिदश्व-करयोगान्मोदयस्व

बालिकाहं सरलमर्थये। तथा करोति।

राजा। किञ्चिदुपसृत्य।

अयमहं हरिदश्व: सरोजिनीं मोदयस्व

प्रार्थना व: फलिता भावये॥

सर्व्वा:। सविस्मयसम्भ्रमं हरिदश्वं पश्यन्ति।

हेम। अह्मो ! को एसो ? । (घ)

नेपथ्ये—

सरोजिनि ? सरोजिनि ? जननी खलु ते समुदितस्नेह-विकारा समानीतसकलालङ्कारा—

अनलङ्कारचारूणि चम्पकाङ्गानि तेऽधुना।

पुनरुक्तिभयं हित्वा त्वामलङ्कर्त्तुमिच्छति॥ २१॥

सरो। साभिलाषं हरिदश्वं पश्यति।

शिव। सस्मितं। सहि ! सरोइणी हरिदस्ससंजोओ क्खु पहादं अवेक्खदि। (ङ)

(घ) अहो ! क एष: ?।

(ङ) सखि ! सरोजिनी हरिदश्वसंयोग: खलु प्रभातमपेक्षते।

मरो। णामहेअमेत्त सदिसत्तणेण को क्खु संजोओ ? । (च)

हेम। हला सहि ! अम्बा कञ्चुइणा तुमं आमन्तेदि, ता एहि घरं ज्जेव गच्छह्म । (छ)

मरो। प्रियं हरिदश्वञ्च विलोक्य। चित्तलेहे ! पेक्ख मालिआए महेसस्स सुस्सोरिअत्तणं । (ज)

चित्र। साकूतं जनान्तिकं। हरिदस्सस्स त्ति भण । (झ)

मरो। तस्स कहिं मालिआ ? । (ञ)

चित्र। तुए दादव्वा । (ट)

मरो। सरोषमिव। अत्तण उवमाणेण सव्वं पेक्खसि, ता अहं जामि । किञ्चित् प्रस्थाय स्वगतं।

पिअजण दस्सणलाहो सही वि चदुरा णिअड़े विदूसओ ।
विसमो समअक्खेवो असुलहो उण ईदिसो समओ ॥ २२ ॥

इति निष्क्रान्ता ।

(च) नामधेयमात्रसदृशत्वेन कः खलु संयोगः ? ।

(छ) हला सखि ! अम्बा कञ्चुकिना त्वामामन्त्रयति, तदेहि गृहमेव गच्छामः ।

(ज) चित्रलेखे ! प्रेक्षस्व मालिकया महेशस्य सुश्रीकत्वम् ।

(झ) हरिदश्वस्य इति भण ।

(ञ) तस्य कस्मिन् मालिका ? ।

(ट) त्वया दातव्या ।

(ठ) आत्मन उपमानेन सर्वं प्रेक्षसे, तदहं यामि ।

प्रियजनदर्शनलाभः सख्यपि चतुरा निकटे विदूषकः ।
विषमः समयक्षेपः असुलभः पुनरीदृशः समयः ॥ २२ ॥

चित्रलेखा हेमप्रभा च निष्क्रान्ते ।

राजा । सरोजिनीप्रस्थानपथमवलोक्य सनिश्वासं । वयस्य ! यदहं मन्ये—

यथैव मम मानसं ननु सरोजिनीं प्रत्यगात्
तथैव किल मां प्रति व्रजति चित्तमस्या अपि ।
गते सति शरद्वये निजनिजस्थले संस्थितं
शरासनयुगं यथा तनुयुगं तथैवावयोः ॥ २३ ॥

नेपथ्ये —

अरे ! दुरात्मन् निवारितप्रवृत्त !!
प्राणस्पृहां परिहरन्न विशुद्धबुद्धे !
रे वञ्चक ! त्वमधुना मधुलाभलोभात् ।
दन्तीन्द्रदन्तविधृतां नलिनीं प्रफुल्ला-
मुल्लासयन्निजमनो यतसे ग्रहीतुम् ॥ २४ ॥

विदू । आकर्ण्य सभयं हरिदश्ववस्त्राञ्चलमवलम्ब्य । वअस्स ! रक्ख रक्ख मं । (ड)

राजा । सवितर्कमाश्वास्य । मा भैषीः ।

विदू । सकातरं हरिदश्वमाकृष्य । किं ण सुणेसि सरोइणी कामुअं तुमं ज्जेव आक्कोसदि । (ढ)

राजा । अये ! आगच्छ, प्राचीरान्तराले प्रतिपालयन्तौ पश्यावः किं वृत्तमिति । तथा कुरुतः ।

(ड) । वयस्य ! रक्ष रक्ष माम् ।

(ढ) । किं न शृणोषि सरोजिनीकामुकं त्वामेव आक्रोशति ।

ततः प्रविश्य कश्चित् खड्गपाणिः पुरुषः "अरे दुरात्मन् !" इत्यादि श्लोकान्तं पुनः पठति ।

ततः प्रविश्य तादृगपरः पुरुषः । आः क्रूरमते ! आसन्नमृत्युविनष्टबुद्धे ! सिंहेऽपि वञ्चकभ्रमः ?

रे क्षुद्र ! दुर्बलपशो ! मरणादभीत !
यं वञ्चकं कथयसे तमवेहि सिंहम् ।
योऽयं भवादृशसहस्रगजेन्द्रयूथं
विद्रावयन् द्रवति रोषकषायिताक्षः ॥ २५ ॥

प्रथमः । सरोषं । आः पामर ! यद्यपि पङ्गोर्गिरिलङ्घनवासना, पतङ्गस्य वह्निग्रासोद्यमः, मूकस्य च वक्तृभावः सम्भवति, तथापि न ते वीरत्वगर्वः । अरे ! किमन्यत्—

दुर्दण्डाखापदण्डाच्चलितघननदद्बाणदण्डैः प्रचण्डै-
र्दुर्भक्षैर्दैस्छिन्नमुण्डस्तदनुशितशरैः खण्डखण्डीकृताङ्गः ।
निष्प्राणः प्राणहीनः शकुनिपरिवृतो बान्धवैः क्रन्दनान्धैः
सम्प्रत्येव त्वदीयैः पशुरिव समरे दुष्ट ! दर्शिष्यसे त्वम् ॥२६॥

द्वितीयः । सरोषावष्टम्भं । अरे रे मानवकुलकदन ! वृथा नाम विकत्थसे ।

गर्वं खर्वजने च शीतपवनं हेमन्तकाले, पुन-
र्ग्रीष्मे वह्निकणं कुटुम्बकटुतां नो संसहन्ते जनाः ।
तस्मात्त्वां विनिहत्य दुर्ज्जनतमं लोकेऽस्मि सन्तोषकृत्
दुष्टानां दमनाच्च शिष्टभरणाच्च प्रीयते को जनः ? ॥ २७ ॥

उभौ । तदागच्छ, समरोचितां स्थलीमेवाश्रयामः ।

इति वेगेन निष्क्रान्तौ ।

राजा । पुनः प्रविश्य । कीदृशेनान्तःकरणेन प्रस्थिता सरोजिनी ? अपि वा पुनरपि सा नयनविषयिणी भवेत् ? चित्रलेखा वा किं प्रबोधयति तां ? कुतो वा सहसागतयोरयं वीरयोः समर-समुद्योगः ? सत्यमेवाहमसुना विविधभावमहिम्ना समाकुलोऽस्मि ।

विदू । पुनः प्रविश्य । वअस्स ! सरोइणीविसओ ज्जेव एसो वीरसंलावो त्ति तक्केमि । (ण)

राजा । ममापि तथैव भावनया—

भावेन तु सरोजिन्या वर्द्धिता तद्गता स्पृहा ।
सहसा वीरगर्वेण खर्वीभवति सा पुनः ॥ २८ ॥

सविमर्षं । अनया च विपुलव्यापारणया—

दीर्घं निश्वसितं मनो विचलितं, देहश्च रोमाञ्चित-
मुष्णोऽसौ मलयानिलोऽपि ललितः, कामोऽपि वामो मम ।
किं निश्चित्य सरोजिनी स्वहमगात्, किं वा सखी तां वदेत्
सन्देहाकुलिता विवेकरहिता बुद्धिश्च वीरद्वये ॥ २९ ॥

इति निष्क्रान्तौ ।

प्रथमोऽङ्कः ।

(ण) वयस्य ! सरोजिनीविषय एव एष वीरसंलाप इति तर्कयामि ।

द्वितीयाङ्के गर्भाङ्कः ।

अथ प्रविशति सूत्रधारः ।

हरे ! तव मुखे पदं किमु सरस्वती न्यस्यति ?
विलोक्य तव मूर्द्धनि त्रिपथगां, कुतः श्रीश्च वा ।
समस्तवपुषि स्थिता ? त्वदुरसीश्वरीदर्शनात्
स कौतुकमिदं वचो हरहरीरितं पातु वः ॥ १ ॥

किञ्च—

जाह्नवीयमुनयोर्जलतुल्यौ शुक्लकृष्णवपुषौ प्रकृतीशौ ।
राधिकानरहरौ विहरन्तौ सज्जनो जगति गायतु नित्यम् ॥२॥

नेपथ्ये गायति ।

विजने कुञ्जवने वसति वनमाली
निनदति सुमधुरं दिशि दिशि कोकिलाली ।
ईदृशसमये राधा समुपेत्य मृदुपदा ।
पिदधाति तस्य दृशौ स्वपाणिना चारुकेली ॥

सूत्र । आकाशे । पारिपार्श्विक ! केन खल्विदं गीयते ? । आकर्ण्य । किं ब्रवीषि ? सरोजिनीनिदेशात् गायन्ती चित्रलेखा हरिदश्व-हरणाय मालवराजधानीमभ्युपैति, अये ! अभिनवा किलेयं वार्त्ता, यत्पाणिपीड़ने वर एव कन्यां हरति, अत्र तु कन्या वरं हारयति, तदवश्यमेवेदं द्रष्टव्यम् । इति निष्क्रान्तः ।

प्रस्तावना ।

ततः प्रविशति चित्रलेखा ।

चित्र। हेमप्पहे! हेमप्पहे! तुमं आमन्तेमि, बअणं मे सुणिअ गच्छ। (क)

प्रविश्य हेमप्रभा। किं त्ति ?। (ख)

चित्र। अहं जाव ओसहिं आहरिअ आअच्छामि, दाव तुमं खणं वि सरोइणीसआसं ण परिहरिस्ससि। (ग)

हेम। सहि! तं ज्जेव वुत्तन्तं तुए सुमराविदह्मि, णं कधेहि, अज्ज कदि दिणाइं जाव सरोइणी कम्पि ण आलबदि, किम्पि ण खाएदि, केवलं सुण्णहिअआ विअ किम्पि चिन्तेदि। (घ)

चित्र। अदो ज्जेव ओसहिं आहरिस्सामि। (ङ)

हेम। हला घरवेज्जो किं ण चिइच्छदि ?। (च)

चित्र। बहिणि! घरवेज्जो एरिसं जणं ण चिइच्छिदुं अरिहदि। (छ)

(क) हेमप्रभे! हेमप्रभे! त्वामामन्त्रयामि वचनं मे श्रुत्वा गच्छ।

(ख) किमिति?

(ग) अहं यावदोषधिम् आहृत्य आगच्छामि, तावत्त्वं क्षणमपि सरोजिनीसकाशं न परिहरिष्यसि।

(घ) सखि! तमेव वृत्तान्तं त्वया स्मारितास्मि, ननु कथय, अद्य कति दिनानि यावत् सरोजिनी कमपि न आलपति, किमपि न खादति, केवलं शून्यहृदया इव किमपि चिन्तयति।

(ङ) अतएव ओषधिमाहरिष्यामि।

(च) हला! गृहवैद्यः किं न चिकित्सति।

(छ) भगिनि! गृहवैद्यः ईदृशं जनं न चिकित्सितुम् अर्हति।

हेम। जइ तुमं एरिसी ज्जेव चिइच्छिआ, तहिं वच्छररोइणं मह पिदामहं किं ण चिइच्छसि ? तदा क्खु दे तादो मुद्दासदअं दास्सदि। (ज)

चित्र। सस्मितं। हला मुद्धे ! तहिं मह अहिआरो णत्थि। जदो (झ)। संस्कृतमाश्रित्य—

> अन्धकारमहनि प्रभाकरो
> हन्तुमर्हति, निशागमे न तु।
> एवमेव विषयस्य भेदतो
> भिन्नभिन्नजनयोग्यता स्मृता॥ २॥

बहिणि ! ता जाहि जाव, जेण सा सम्पदं एआइणी वट्टदि। (ञ)

हेम। जह आणवेसि। (ट) इति निष्क्रान्ता।

चित्र। संस्कृतमाश्रित्य * अये ! प्रेषितास्मि खलु मनोभवतरङ्गिन्या सरोजिन्या हरिद्रस्य हरणाय। किन्तु तव सरोजिन्यामिव हरिद्रेऽपि चेन्मनोभवस्याधिकारः, तदैव मे वासना भविता फलवती, इतरथा तु नहि खलु संयुज्यते सन्तप्तहेमशलाका

(ज) यदि त्वमीदृश्येव चिकित्सिका, तर्हि वत्सररोगिणं मम पितामहं किं न चिकित्ससि ? तदा खलु ते तातो मुद्राशतकं दास्यति।

(झ) हला मुग्धे ! तस्मिन् मम अधिकारो नास्ति। यतः—

(ञ) भगिनि ! तद् याहि यावत्, येन सा साम्प्रतमेकाकिनी वर्त्तते।

* "योषित्सखीबालवेश्याकितवाप्सरसां तथा।
वैदग्ध्यार्थं प्रदातव्यं संस्कृतं चान्तरान्तरा॥" इति साहित्यदर्पणम्।

शीतलहैमदण्ड इति सुप्रतीतमेव। अथवा कुत एष मे विषयः संशयस्य? न खलु वारिप्रवाहः तीरमेकतरमेव प्लावयते। विभाव्य सहासम्। अहो! देवाङ्गनापि लौकिककलङ्कमाशङ्कते। यतः—

युगपदेव युवद्वयमुत्सुकं
श्रयति सा सहसा सरसा रतिः।
ननु बिभेति समेत्य समाजतः
परपुमांसमुपांशु सुपांशुला॥ ४॥

अये! अप्सरसश्चित्रलेखायाः शिक्षितेयं गगनगमनविद्या समयविशेषादद्य फलवती जाता। अथवा किमत्र केवलं—

न कापि शिक्षा विफलायते क्वचित्
महाफला स्यात् समये समागते।
हरौ समेते हरिणो विपद्यते
कपिः समुत्प्लुत्य तरौ हसत्यपि॥ ५॥

भवतु तावत्, यथाभिलाषमेव सम्पादयामि। इति छोटिकां तालत्रयञ्च दत्त्वा गगनगमनं नाटयति।

ततः प्रविशति राजा विदूषकश्च।

राजा। वयस्य! जानासि किमर्थमविकलशशिकलाविमलाननाया अपि देव्यास्तादृशमाननमालिन्यम्?।

विदू। तुमं ज्जेव णिस्सेसि, जइ मह अज्झवसाअं देई ण जाणादि त्ति, किन्तु णिउणमिआ सा जा सव्वं ज्जेव जाणादि

त्ति तुमं ण बुज्झसि । णं पेक्ख, जहिं दिवाअरो णलिणीए करं देदि, तहिं ज्जेव समए पढमग्गहीदा उसा पचिट्ठदि । (ठ)

राजा । तेन हि नूनं त्वमेव देव्यै वृत्तान्तमिममावेदितवानसि, यतो भवादृशेषु कृतो वाग्विन्यासः खधूपेषु विन्यस्तो वह्निरिव तत्क्षणात् परिस्फुरति ।

विदू । एसो हि णेसग्गिओ धम्मो पच्छन्नवत्तिणो जणस्स, जह सअं अकज्जं कदुअ परेसु पउत्तावेदि । णवा कहं चोरेहिं राअघरं चोरिअ मण्डव्वे चोज्जं पमाणिदं । (ड)

तत: प्रविशति गगनादवतरन्ती चित्रलेखा ।

चित्र । इयं सा राजधानी, तत्कतमस्मिन् प्रदेशे तावदवतरामि ? । अङ्गुल्या निर्दिश्य । इयं विपणि:, असौ पशुशाला, इदं नाट्यमन्दिरम्, अमी होमगृहा:, असौ सुधाधवला सौधमाला, इयं वापी, इदञ्च प्रमोदोपवनम् । अये ! कथमसौ विदूषकेण समालपन्नुपविष्टस्तिष्ठति हरिदश्वः । अहो ! विदूषकेण सह य: संलाप: सोऽवश्यमेव श्रोतव्य: । अस्मि च प्रच्छन्नविद्यावती, तदस्मिन्नुपवन एवावतरामि । इत्यवतीर्य्यैकान्ते स्थिता ।

राजा । सखेदम् । वयस्य ! किं ब्रवीमि ? अहं हि सम्प्रति—

(ठ) त्वमेव निर्णयसि, यथा मम अध्यवसायं देवी न जानाति इति, किन्तु निपुणिका सा यत् सर्वमेव जानातीति त्वं न बुध्यसे । ननु प्रेचस्व, यस्मिन् दिवाकरो नलिन्यै करं ददाति, तस्मिन्नेव समये प्रथमगृहीता ऊषा प्रतिष्ठते ।

(ड) एष हि नैसर्गिको धर्म: प्रच्छन्नवर्त्तिनो जनस्य, यथा स्वयमकार्य्यं कृत्वा परेषु प्रवर्त्तयति । नवा कथं चौरै: राजगृह चोरयित्वा माण्डव्ये चौर्य्यं प्रमाणितम् ? ।

देवीविरागमनुमत्य सरोजिनीं तां
प्रेम्णु र्विमोहविकलो विफलप्रयासः ।
पाणिस्थहेम परिहाय चलन् सुमेरौ
दुर्भाग्यतोऽद्य मरुभूमिमुपागतोऽस्मि ॥ ६ ॥

विदू। वअस्स ! दाणिं जाव सरोइणीए राअगन्धोवि तुए ण लक्खिदो ? । (ढ)

राजा। रागगन्धोऽपि न लच्चितः । किन्तु स एव संशय-विषयः । तथाच—

कुसुमं धनुः, कुसुममेव शरः,
कुसुमं गुणः कुसुमशस्त्रभृतः ।
अपि लच्चिता कुसुमितैव वधूः
रतिसंलवोऽपि न तथापि कथम् ॥ ७ ॥

चित्र। अहो ! स एवायमालापः, तद् यथार्थमेव निरणैषं यथा न खलु वारिप्रवाहः तीरमेकतरमेव प्लावयत इति ।

विदू। वअस्स ! समस्सस, णक्खु पज्जुत्तो अपदे पदं अप्पिअ अकिदत्थो होदि । (ण)

राजा। सखे ! इतोऽपि छायेव प्रतिकूलतां नीता देवी, ततोऽपि च दूरवर्त्तिनी सरोजिनी, तत्कुतः समाश्वासो हरि-दश्वस्य ? ।

(ढ) वयस्य ! इदानीं यावत् सरोजिन्या रागगन्धोऽपि त्वया न लच्चितः ? ।

(ण) वयस्य ! समाश्वसिहि, न खलु प्रयुक्तोऽपदे पदम् अर्पयित्वा अकृतार्थो भवति ।

चित्र। अये! नियतिवशेन प्रातःसमय इव दूरवर्त्तिन्यपि साम्प्रतमेवासन्नवर्त्तिनी भवेत् हरिदश्वस्य।

विदू। अह्लो! समअं अवेक्ख, ण क्खु केण वि मूलं गदुअ ज्जेव णारिएलरसो पिवीयदि। (त)

राजा। अये! परोपदेशपेशल! दुरतिक्रमो हि वियोगमुहूर्त्तमहिमा वियोगविधुराणाम्।

विदू। अह्लो! तुमं किं कड़ाहे तेलं अप्पिअ आगदो। (थ)

राजा। अये! सुस्थान्तरा हि नाभिजानन्ति परक्लेशान्। अहन्तु—

तां जानन् हृदयंगतां प्रियतमां तच्चिन्तया तन्मय-
स्तस्यास्तारुकथां शृणोमि च पुनः पश्यामि चारु स्मितम्।
गाढ़ाश्लेषसुखान्यवाप्य च ततोऽपोत्कुर्यदालिङ्गितुं
शून्यं वीक्ष्य तदा प्रसारितकरो दग्धोऽस्मि चिन्ताग्निना ॥८॥

विदू। जं तुमं एरिसं करेसि, ता जइ देई जाणिस्सदि। (द)

राजा। तदा साक्षाच्चण्डी भविता।

विदू। साहु, तदो तां पसारिअ पढ़िस्ससि। (ध)

(त) अहो! समयम् अपेक्षस्व, न खलु केनापि मूलं गत्वैव नारिकेलरसः पीयते।

(थ) अहो! त्वं किं कटाहे तैलम् अर्पयित्वा आगतः?।

(द) यत् त्वमीदृशं करोषि, तद यदि देवी ज्ञास्यति?।

(ध) साधु, ततस्तां प्रसार्य्य पठिष्यसि।

राजा। अलमनेन ब्रूहि तावत्, केनाहमधुना देवीप्रसाद-भूमिर्भवेयम्?।

विदू। किं कहेमि? सरोइणीदसणपहुदि तुमं इदो चिट्ठसि, तदो गच्छसि, देई तु आगदुअ सअणे तुमं अपाविअ आमिसा-लाहेण खाअणलोलुहा केसरिणी बिअ भिसं कुप्पदि। (न)

राजा। तेनैव खल्वभिधीयतां कोपप्रशमोपायः।

विदू। अज्ज तुमं पढमं ज्जेव शअणे पड़िस्ससि, तदो जदा देई आगमिस्सदि, तदा तां अच्चिस्ससि। (प)

राजा। केन वस्तुना?।

विदू। मन्महो जं जं पसूणसरं क्खिविस्सदि, तेण तेण ज्जेव तुमं पसूणेन देईं अच्चिस्ससि। (फ)

चित्र। अये! साधीयानयमुपायश्चिन्तितः।

राजा। सचिन्तम्। अये! न खलु सा देवीजातिः, न च अनु-नयेन वा प्रयाति परितोषं, यस्याः खलु मान एव कोपः। तथाच—

पूर्वं यत्नाद्विविधकथिताऽप्यन्तिके नाभ्युपैति
ग्रेषे नेत्राद्विसृजति जलं नासिकाग्रब्दयुक्ताम्।

(न) किं कथयामि सरोजिनीदर्शनप्रभृति त्वम् इतस्तिष्ठसि, ततो गच्छसि, देवी तु आगत्य शयने त्वामप्राप्य आमिषालाभेन खादनलोलुभा केसरिणीव भृशं कुप्यति।

(प) अद्य त्वं प्रथममेव शयने पतिष्यसि, ततो यदा देवी आगमिष्यति, तदा त्वाम् अर्चयिष्यसि।

(फ) मन्मथो यं यं प्रसूनशरं क्षेप्स्यति, तेन तेनैव त्वं प्रसूनेन देवीम् अर्चयिष्यसि।

आमर्षार्थं वपुषि च कृतं पाणिमुत्सार्य्य याति
देवी न स्याद्भवति महिषी किन्तु सा मानभङ्गे ॥ ९ ॥

भवतु, अद्य भवद्विहितमुपायमेवावलम्बिष्ये।

नेपथ्ये शायनिकः शङ्खध्वनिः।

तत्रैव च वैतालिकः पठति।

तूष्णीम्भूता दिवसमुखरा सुप्तलोका पुरीयं
एकैकश्च प्रहरिनिकरो वर्त्तते द्वारवृन्दे।
याता रात्रीमपि परिहरन् याति चन्द्रः प्रतीचीं
जाता यूनां नयनपथगा स्त्रीसपत्नी च निद्रा ॥ १० ॥

राजा। सचकितमाकर्णयते।

विदू। हन्त! अज्ज वि गदो तुह अणुणअसमओ, जेण सा सअणं आगदुअ विमणाअन्ती गदात्ति तक्केमि। (ब)

राजा। वयस्य! तेन हि भवानितो निजनिलयमेव प्रतिष्ठताम्, अहमपि इत एव गच्छामि।

विदूषको निष्क्रान्तः। अन्तर्यवनिकोत्सारणम्।

ततः प्रविशति राजा चित्रलेखा च तमनुसरति।

राजा। पर्य्यङ्कमारुह्य सनिश्वासम्। प्रियतमे! सरोजिनि! पातु खलु भवतीवदनचन्द्रिकां नयनं मे सततमेव साभिलाषम्। अपि च भवत्याः प्रथमदर्शनात् प्रभृति मम वैराग्यं विषये देव्याश्च, अरुचिराहारे शरीरे च, शून्यता आशायां मनसि च,

---

(ब) हन्त! अद्यापि गतस्तवानुनयसमयः, येन सा शयनमागत्य विमनायमाना गतेति तर्कयामि।

वियोगः सुखेन त्वया च, कण्टकमङ्गे त्वत्सङ्गे च नित्यमेव वर्त्तते। किञ्च मया हि दूरता भवत्याः समीपता दुःखस्य, अनुकूलमौत्सुक्यं विरोधी पुष्पधन्वा, रतिर्भवत्यां विरतिः कामे चानुभूयते। अयि! अनधिगतपरक्लेशे! मादृशे विवशजन-विशेषे किमुतान्यथा किमपि संशेषे? येन हृदयं गतापि दर्शनं न ददासि। पश्य—

हृदये प्रतिभासि सन्ततं
व्यथकस्त्वद्विरहस्तथापि मे।
विषमे समये समागते
विगुणत्वं हि गुणोऽपि गच्छति॥ ११॥

चित्र। विशेषणं परिवर्त्तयन्ती सरोजिन्यपि भवन्तमेता-वन्त्येव वक्ति।

राजा। अयि! कुसुमायुध! ननु मामेव पराजितुं भवत-स्तूणमद्य नूनं शरशून्यं भविता। तथापि—

सम्प्रेषयन् यदि रतिं हृदि मत्प्रियाया
मां सर्वदा प्रहरसे तदपीष्टमेव।
दाता विनिन्दति धनानि यदि प्रदाय
प्रार्थी प्रकुप्यति तदा न कदापि तस्मै॥ १२॥

अहो! अनङ्गोऽहमस्मि प्रहारपटुश्चेति मा कुरु गर्वं येन तावत्, अनङ्गः किल वसन्तो मलयानिलश्च, तयोरपि भवत्तो न्यूनं न खलु प्रहारपाटवम्। तथाच—

कुर्वन्नङ्गं सुशीतं मलयगिरिमरुत्तापयत्यन्तरञ्च
पुष्पामोदं वसन्तो ददपि कुरुते चेतसि क्लेशजालम्।
तस्मात् कन्दर्प! दर्पं परिहर नितरामात्मनैपुण्यजन्यं
श्रेयाश्च श्रेयसोऽन्ते भवति हि भुवने कस्यचित् स्वाभिमानः ॥१३॥

चित्र। अयि मालवेश्वर! आसन्नविनाश एव ते विषाद एषः, तत्कथमेतावदाकुलोऽसि?। अथवा कादम्बिनीपरिपिहितप्रायो हि विवस्वान् विशेषेण तीक्ष्णो भवति। भवतु, विफलो मे विलम्बः, सम्प्रति हि प्रियसखी मे शतवृश्चिकेनेव दश्यमाना, शून्यतयेव वक्षसि गृह्यमाणा, वह्निवृन्तेनेव वीज्यमाना—

नहि निजनिलये वा पुष्पशय्यातले वा
न पुनरुपवने वा सङ्गतौ वा सखीभिः।
मदनपवनवाणाविध्यमानेव दीना
न भवितुमिह शक्ता स्थैर्य्यमाप्तुं कदाचित् ॥ १४ ॥

भवतु, निद्रापयामि तावदेनम्। मन्त्रपाठमभिनीय सर्षपान् विकिरति।

राजा। देवि! अद्य भवतीमनुनेतुमेवाहमुपनीतोऽस्मि, किन्तु तथापि लोचनचुम्बिनी सुप्तिरेषा सपत्नीव भवत्याः प्रतिकूलतामाचरति। अहो! सुषुप्तिर्नाम महदारामस्थानं शरीरिणाम्। तथाहि यस्याम् अस्पष्टमिव।

न क्लेशलेशो विषयस्पृहा च
मोहो नवा, नेन्द्रियवृत्तिरस्ति।
तत्त्वज्ञता कारणमन्तरेण
सा प्राणिनां मुक्तिरियं हि निद्रा ॥ १५ ॥

हन्त भोः । यत्नादपि न शक्नोमि लोचनयुगलमुन्मीलयितुम् ।
इति निद्राति ।

ततः प्रविशति विमना देवी ।

देवी । राजानमवलोक्य । अम्महे ! अज्ज महन्तं ज्जेव अनुग्गहं पेक्खामि, जेण दाणिं जाव इदो तदो परिमग्गिअ वि जो ण दिट्ठउब्वो, सो पढमं ज्जेव अज्ज आअदो । अधवा परिच्चअण-समए हि णिम्मल्लस्स गन्धं गेह्णदि साहओ भोदु, पेक्खामि दाव णिद्दिदो णवत्ति । (भ) इत्युपसर्पति ।

चित्र । कथमियं देवी, तत् किमेनामपि निद्रापयामि ? मैवं तावत्, नहि भवति युक्तिमती परार्थो खलु परवञ्चना ।

राजा । स्वप्ने प्रलपति । अयि प्रियतमे ! गन्धर्वराजनन्दिनि ! सरोजिनि ! दयितापि निर्दयेव, स्पृश्यमानापि क्षतमानेव कथ-मदृश्यमाना भवसि ? किन्तु अस्मिन् विनिमये लाभस्ताव-न्ममैव । पश्य—

त्वं केवलं हृतवती हृदयं मदीयं
रूपं समस्तमपि ते हृतवानहन्तु ।
त्वं तत्तु रक्षितवती निजसर्वगात्रे
प्राविशयं तव तु रूपमहं हृदज्ञे ॥ १६ ॥

(भ) अम्महे ! (इत्याश्चर्यसूचकमव्ययम्) अद्य महान्तमेवानुग्रहं प्रेक्षे, येन इदानीं यावत् इतस्ततः परिमार्ग्यापि यो न दृष्टपूर्व्वः, स प्रथममेवाद्य आगतः । अथवा परित्यजनसमये हि निर्म्माल्यस्य गन्धं गृह्णाति साधकः । भवतु, प्रेक्षे तावत् निद्रितो नवेति ।

चित्र। साशङ्कम्। अये ! इयं देवी सन्निहिता, तत् किमिदं प्रलपति राजा ?। यत् सत्येयं किल लोकवार्त्ता,यत्रास्ति द्वकभयं तत्रैवाविर्भवति विभावरी। तन्मन्ये, सरोजिनी हरिदश्वयोगः सान्तराय इति।

देवी। सरोषविषादं। हिअअ ! कीस तुह अज्जवि अज्जउत्तोवरि एरिसो सिणेहो ? कमलिणीरसं पिवीअ केवलपक्खपवणेण सीदलीकादुं उज्झट्टे महुअरे मुद्दणं ज्जेव जुत्तं कुमुदिणीए हद्दी जं सददं ज्जेव सुमरेमि, सो मं परिच्चअदि। (ब)

इति सजलनयना राजानं पश्यति।

चित्र। देवि ! युज्यत एव विषाद एष ते। परतरणिमधिरूढे हि कर्णधारे परिहीयमाणा पुनरात्मतरणिः प्रायेण परिभ्रमति।

देवी। सरोषम्। धूत्त ! धूत्त ! चिट्ठ दाव तुमं, अविलम्बं ज्जेव तुह पडिसोहं करेमि। चिन्तयित्वा। एव्वं दाव। लिपिं विन्यस्य राजहस्ते पत्रमर्पयति। भोदु, सुणुह्मि दाव परं किं पलवदि ?। (म)

इत्येकान्ते तिष्ठति।

चित्र। अहो ! रजनीं यावदितो न यास्यति देवी, तदद्य

(ब) हृदय ! कीन तव अद्यापि आर्य्यपुत्रोपरि ईदृशः स्नेहः ? कमलिनीरसं पीत्वा केवलपक्षपवनेन शीतलीकर्त्तुमुद्यते मधुकरे मुद्रणमेव युक्तं कुमुदिन्याः हा धिक् ! यं सततमेव स्मरामि, स मां परित्यजति।

(म) धूर्त्त ! धूर्त्त ! तिष्ठ तावत्त्वं, अविलम्बमेव तव प्रतिशोधं करोमि। एवं तावत्। भवतु, शृणोमि तावत् परं किं प्रलपति।

न किमपि भविता। भवतु वार्त्तामिमां सरोजिनीमावेदयामि तावत्। इति निष्क्रान्ता।

तत: प्रविशति सरोजिनी।

सरो। अये! अनुचरसमालोचनापरिचितमिदं हरिदश्व-शयनमन्दिरं यावत् प्रविशामि। अहो! इयमस्मि सरोजिनी हरिदश्वहरणाय स्वभावचतुरां चित्रलेखां सम्प्रेष्य बलवत्सन्दिहाना संवृत्ता। येन हि आहारमाहर्त्तुं बुभुक्षमाणस्य नियोग: सम्पद्यते खलु निजनैराश्याय। विलोक्य। हन्त भो:! स एवायं शयितस्तिष्ठति। सानुरागम्। यदि मदीयेन चक्षुषा अमुं किलावलोकयन्ति लोका:, तदायं ममेव तेषामपि प्रियतमो भवेत्। भवतु, यथा केवलं अयमेव मां पश्यति, तथा प्रच्छन्ना भवेयम्। इत्येकान्तमवलम्बते।

नेपथ्ये मध्यमयामिक: शङ्खध्वनि:।

राजा। चकितं नयनमुन्मील्य। अहो! गभीरेयं विभावरी। तथाहि—

एकैक: प्रहरी पुरीपरिसरे जागर्त्ति दीर्घं नदन्
कश्चित् कूजति कोकिलश्च, मधुलिट् पुष्पे वसन् गुञ्जति।
वातो वाति शनै: शनै: सनिनदं शुष्कश्च पर्णं वहन्
विश्राम्यन्ति शरीरिण: सदयया क्रोड़े कृता निद्रया॥ १७॥

शयनीयमवलोक्य। कथमद्यापि विलम्बते देवी? अथवा उपेत्य मामुपात्तनिद्रमवलोकमाना कृतमाना प्रतिनिवृत्ता भवेत्। अहो! वामेति सान्वया खलु संज्ञा सीमन्तिनीनाम्। तथाहि—

स्वपिति च वामपार्श्वे दक्षिणेऽपि च समाचरति वामम्।
वीक्षते च वामदृशा महती हि निपुणता विधातुः॥ १८॥

भवतु, पश्यामि तावत्। समन्तादवलोक्य सरोजिनीमङ्गुल्या निर्दिश्य अये! केयं लक्ष्मीरिव सौधस्य, चन्द्रिकेव लोचनयुगलस्य, महौषधिरिव मदनामयस्य चित्रिता कामिनीमूर्त्तिः? अहो! स्पन्दनवतीयं न चित्रिता। तत् किमयं मे स्वप्नः? उत वा कामिनीमूर्त्तिरेवेयम्?। अहो! रूपमिदम् अलौकिकमद्वितीयञ्च परिलक्ष्यते। तथाहि—

शशिकला सकला तनुमण्डले
नयनयोरनयोरसितोत्पले।
विकसितञ्च सितं कमलं मुखे
समुदये च सुवर्णलता मता॥ १९॥

तन्मन्ये—

जातः पर्वविधुर्विधुन्तुदभयान्मुक्त्वा कलङ्कं मुखं
भूते पङ्करुहः कुचौ च कलिके भीत्या हिमांशोः करात्।
कान्तः किन्तु पिबेत्तदेव हि मुखं मर्द्दैत् करेणैव तौ
सर्वः क्लेशमुपैत्यदृष्टवशतो हन्तान्यजन्मन्यपि॥ २०॥

सरो। वेपते।

देवी। सावष्टम्भमाकर्णयति।

नेपथ्ये। देवि! सारस्सदनन्दिनि! गेह्ण विदूसअं, अह म्वि तुह विसत्तिं रसो कधेमि। (य)

(य) देवि! सारस्वतनन्दिनि! गृहाण विदूषकम्, अहमपि तव विश्रान्तिं राज्ञः कथयामि।

देवी। सगर्वं निष्क्रान्ता।

सखी। सखार्थं विलोक्य निश्वस्य च। परापतति हि देवी परिचारिका तदत्र न मे सफलमवस्थानम्। हन्त भोः! विघ्नबहुला हि प्रायशः फलसिद्धिः। आगमनमिदं मे दुःसमयदूषितम्।

तथाच—

मालवेशनिकटे प्रगल्भता
संशयोऽप्यजनि मे सखीजने।
दुर्ज्जनात् पथि महाभयं स्थितं
मन्मथेन विहिताहमाकुला॥ २१॥

इति निष्क्रान्ता।

राजा। विलोक्य सविषादम्। हन्त! हन्त! प्रस्थितेयं लावण्यमयी मूर्त्तिः। किमियं सरोजिनी? अथवा सरोजिनीसमाना काचिदन्या? उत वा स्वप्न एव?। धिक् कष्टम्! नाशक्नुवं किल वाचापि निर्णेतुम्। येन हि मादृशानाम्—

इच्छा वक्तुं भवति महती, किन्तु वक्तुं न शक्ताः
शक्तौ सत्यां स्फुरति हृदये किं ब्रवीमीति तर्कः।
चित्ते लज्जा, परजनभयं, देहकम्पोऽप्युपैति
यूनामित्थं दयितयुवतेरन्तिकेऽप्यन्तरायाः॥ २२॥

प्रविश्य देवी परिचारिका। जेदु जेदु भट्टा, देव! देई भवन्तं आमन्तेदि। (२)

राजा। साश्चर्यम्। कुत्र देवी?।

---

(२) जयतु जयतु भर्त्ता। देव! देवी भवन्तमामन्त्रयति।

परि। पमदसोहे। (ल)

राजा। तदुपदिश पन्थानम्। स्वगतम्। न जाने देवी किमद्य विधास्यति ?।

इति निष्क्रान्तौ।

गर्भाङ्कः।

—o—

द्वितीयोऽङ्कः।

ततः प्रविशति सपरिवारा देवी विदूषकश्च।

देवी। माहव! कधेहिं किंणिमित्तं तुह वअस्सो उदासीणो सम्वुत्तो त्ति। (क)

विदू। भोदि! साहु पुच्छिदोह्मि, पढमं दाव कधेहि कधं तुमं पुरिसोसि ?। (ख)

देवी। सस्मितम्। कोरिसं ?। (ग)

विदू। जेण भोदी पहु, सो तुह आअत्तो त्ति। (घ)

देवी। धूत्त! परिच्चअ दाव सढ़त्तणं, कधेहि कधं तुह वअस्सो उदासीणो सम्वुत्तो। (ङ)

विदू। भोदि! णं संसारिणं ज्जेव तं पेक्खामि, ~~जेण~~

(ल) प्रमदसौधे।

(क) माधव! कथय किं निमित्तं तव वयस्य उदासीनः संहत्त इति।

(ख) भवति! साधु पृ प्रथमं तावत् कथय कथं त्वं पुरुषोऽसि ?।

(ग) कीदृशम ?

(घ) येन भवतीप्रभुः स तव आयत्त इति।

(ङ) धूर्त्त! परित्यज तावत् शठत्वं, कथय कथं तव वयस्य उदासीनः संहत्तः।

थाकिलेना

पेक्खन्ति जेण वअस्सेण दण्डो ण गहीदो घरे खाअणं बिण परिच्चत्तं णवा णअरादो णिक्कन्तं। (च)

देवी। धूत्त! दाणिं बि ण कधेसि? हला चवलिए! णं इमिणा रस्सिणा संजमावेहि दाव। (छ)

चप। रश्मिमाददाति।

विदू। (सातस्वरं) को को एत्थ चिट्ठसि? सोग्घं सोग्घं एहि, देई उच्छुग्गं अकदुअ मं णरबलिं देदि। (ज)

ततः प्रविशति राजा मलिना च।

मलि। भट्टिणि! एसो भट्टा। (झ)

देवी चपलिका च। कथञ्चित् सम्भ्रान्ता।

राजा। आत्मगतम्।

नीलं निचोलयुगलं ललिताङ्गकान्तिं
हेम्नो लतां मरकतांशुरिवावृणोति।
चारुस्मितं कुटिलवीचणमाततं तत्
सा कीदृशीति मन एव विबुध्यते मे॥ २३॥

(च) भवति! ननु संसारिणमिव तं प्रेचे, येन वयस्येन दण्डो न गृहीतः, गृहे खादनमपि न परित्यक्तं, नवा नगरात् निष्क्रान्तम्।

(छ) धूर्त्त! इदानीमपि न कथयसि? हला चपलिके! एनमनेन रश्मिना संयमय तावत्।

(ज) कः कोऽत्र तिष्ठसि? शीघ्रं शीघ्रमेहि, देवी उत्सर्गमकृत्वा मां नरबलिं ददाति।

(झ) भर्त्रि! एष भर्त्ता।

विदू । वअस्स ! तुह पाणभीदी वि णत्थि, जेण सअं ज्जेव केसरिणीमुहे णिपडिदोसि । (ञ)

राजा । सभयं देवीमुखमवलोक्य आत्मगतम् । इयमेकासाधारणविलक्षणा जातिः । तथाच—

सरले कुटिलाचारा सुलभे दुर्लभा पुनः ।
मृदुले कठिना नित्यमपमाने च मानिनी ॥ २४ ॥

देवी । सुहागमणं महाराअस्स ? । (ट)

राजा । विशेषतो भवतीदर्शनेन । स्वगतम् । अयमद्य नवीनोपचारः, यदार्य्यपुत्रपदे महाराजेति ।

देवी । ऊणदं त्ति कधिदव्वं विसेसदं त्ति कधिदं । (ठ)

राजा । सभ्रूभङ्गं विदूषकमुखमवलोक्य ।

विदू । मए क्खु सरोइणीणामहेअं वि ण किदं, ता कीस तुए मह उवरि कडक्खो करीअदि ? । (ड)

देवी । मुद्ध ! व्वह्मण ! तुए सरोइणीणामहेअं वि ण किदं किन्तु महाराएण ज्जेव किदं, इट्टमन्तं को विसुमरेदि ? । (ढ)

(ञ) वयस्य ! तव प्राणभीतिरपि नास्ति, येन स्वयमेव केसरिणीमुखे निपतितोऽसि ।

(ट) शुभागमनं महाराजस्य ? ।

(ठ) न्यूनत इति कथयितव्य विशेषत इति कथितम् ।

(ड) मया सरोजिनीनामधेयमपि न कृतं, तत् केन त्वया मम उपरि कटाक्षः क्रियते ? ।

(ढ) मुग्ध ! ब्राह्मण ! त्वया सरोजिनीनामधेयमपि न कृतं, किन्तु महाराजेनैव कृतम्, इष्टमन्त्रं को विस्मरति ? ।

राजा। प्रिये! मृषावचनरचना हि लोकानां लघुताहेतुः।

देवी। ता सच्चं, सच्चरअणा तु ण लहुदाहेदु। (ण)

राजा। प्रिये! प्रणयिनि जनेऽपि परिहासः समयविशेषादम्मानिसमानः।

देवी। परिहासो ज्जेव असणिसमाणो, णक्खु सच्चकधा। (त)

राजा। देवि! ईदृशी सत्यता कुतस्त्वया प्रतीता?।

देवी। चवलिए! तुवराए तुमं महाराअस्स पज्जङ्के पत्तं परिमग्गिअ आअच्छ। (थ)

चप। जं आणवेदि भट्टिणी। इति निष्क्रम्य पत्रमादाय पुनः प्रविश्य। भट्टिणि! एदं तं पत्तअं। (द)

देवी। गृहीत्वा राजहस्ते पुनरर्पयति।

राजा। (गृहीत्वा) वयस्य! वाचय। विदूषकस्यार्पयति।

विदू। पत्रमादाय। ता जाणामि तुमं एरिसो ज्जेव पण्डिदो। (ध) इति वाचयति।

कमलिनीमधु षट्पद! सम्पिवन्
स्पृहयसे किमु शैवलिनी मधु?।

(ण) तत्सत्यं, सत्यरचना तु न लघुताहेतुः।

(त) परिहास एव अशनिसमानः, न खलु सत्यकथा।

(थ) चपलिके! त्वरया त्वं महाराजस्य पर्यङ्के पत्रं परिमार्ग्य आगच्छ।

(द) यदाज्ञापयति भर्त्री। भर्त्रि! एतत् तत्पत्रम्।

(ध) तत् जानामि त्वम् ईदृश एव पण्डितः।

अपि ददर्श भवान् युगपत् क्वचित्
कमलशैवलयोः स्फुटतां द्वयोः ?॥ २५॥

भोदि! तुए तु सोलोअ रअणा सिक्खिदा, ता किं ण णाड़अ रअणा सिक्खा वि करीअदि ?। (न)

चप। भट्टिणि ब्वह्मणो किं भणादि ?। (प)

देवी। अज्ज णूणं इमिणा ओदरिएण मोदअवुभमेण सिद्धि-लड्डुअं भक्खिदं। (फ)

राजा। सहास। देवि! पदविन्यासवशेन मन्ये, यथार्थमेवाभिलक्षितं वयस्येन।

देवी। पत्रमवलोक्यात्मगतम्। अय्यउत्ते! तुवराए ण मए पदव्वदिक्कमो लक्खिदो। प्रकाशम्। बालिआए लिहिदे को णाम पदविवेओ ?। (ब)

राजा। इदं तावत् स्वभावसुलभं कौशलं ललनानाम्।

देवी। मा दाव मा दाव विअत्थेहि। (भ)

विदू। सभयमञ्जलिं बद्धा। भोदि! चण्डि! तुए णिहिलं ज्जेव

(न) भवति! त्वया तु श्लोकरचना शिक्षिता, तत् किं न नाटकरचनाशिक्षापि क्रियते ?।

(प) भर्त्रि! ब्राह्मणः किं भणति ?।

(फ) अद्य नूनमनेन औदरिकेण मोदकभ्रमेण सिद्धिलड्डुकं भक्षितम्।

(ब) आर्य्यपुत्र! त्वरया न मया पदव्यतिक्रमो लक्षितः। बालिकया लिखिते को नाम पदविवेकः ?।

(भ) मा तावत् मा तावत् विकत्थस्व।

असुरउलं उम्मूलिअ कोबचरिदत्थणं किदं, ता दाणिं एक्कं वि णं बअस्सं मे देहि। (म)

राजा। धिक् वैधेय! प्रतिपादय तावत् स्थिरतामात्मनः, देवि! किमिति?।

देवी। सढ! सिविणप्पलावो ज्जेव पमाणं। (य)

राजा। स कीदृक्?।

देवी। स "अयि प्रियतमे! मन्थरराजनन्दिनि!" इत्यादि श्लोकान्तं राजोक्तसन्दर्भं पठति।

राजा। इदमेव तवायथार्थं वचः।

देवी। चबलिए! किं भणसि?। (र)

चप। अह्मेहिं वि तादिसं ज्जेव सुणिदं। (ल)

विदू। बअस्स! एत्थ विआरे विआरपती ज्जेव तुह वादी (व)

देवी। भोदु दाव, सरोइणीं पेक्खिअ विअ उम्मादेण विअ "अये! केयं लक्ष्मीरिव सौधस्य" इदो पहुदि पबन्धो केण उण कधिदो?। (श)

(म) भवति! चण्डि! त्वया निखिलमेव असुरकुलम् उन्मूल्य कोपचरितार्थत्वं कृतं, तदिदानीम् एकमप्येनं वयस्यं मे देहि।

(य) शठ! स्वप्नप्रलाप एव प्रमाणम्।

(र) चपलिके! किं भणसि?।

(ल) अस्माभिरपि तादृशमेव श्रुतम्।

(व) वयस्य! अत्र विचारे विचारपतिरेव तव वादी।

(श) भवतु तावत्, सरोजिनीं प्रेक्ष्य इव उन्मादेन इव "अये केयं लक्ष्मीरिव सौधस्य" इतः प्रभृति प्रबन्धः केन पुनः कथितः?।

राजा। आत्मगतम्। अहो! अस्मिन् खल्ववितथकथासमर्थने समाकुलोऽस्मि संत्रस्तः। यतः—

एकस्य मिथ्यावचनस्य रक्षणे
सहस्रमिथ्यावचनप्रयोजनम्।
विहङ्गमं चालयितुं विहायसि
विहङ्गिमं वस्तु वहु व्यपेक्षते॥ २६॥

हन्त भोः! यदिच शशिनि मलिनता, दिननाथरथे तिमिरसञ्चारः, हुताशने शीतलता, समीरणे च स्थिरता, सतां मनोऽनुकूला, तथापि सीमन्तिनीषु न स्वतन्त्रता। येन हि स्वतन्त्राणां रागो वदने, न पुनरात्मनि, अनुकम्पा शिरसि, न मनसि, सरलता भाषणे, नाचरणे, निर्म्मलता च विहसिते, न चान्तःकरण इति। किन्तु प्रणयिनि जने प्रतिपक्षतेव स्वयोषिति प्रखरता संसारविरागविधायिनी मादृशानां, विषमविधिना सैव मे सङ्घटिता। तथाच—

सन्ध्योपमा नियतरक्तमुखेन वामा
वामोपमं जनमनोहरणेन रत्नम्।
रत्नोपमश्च तमसां हरणेन सूर्य्यः
सूर्य्योपमेयमतितीव्रतया च भार्य्या॥ २७॥

अहो! स खलु स्वप्न एव मे निखिलानर्थमूलम्। येन हि—

साक्षाद्वीक्ष्य सरोजिनीमिव मया सप्रेम यत्प्रेक्षितं
र्यत्प्रालापि च चापलेन, मिलितुं गाढोद्यमो यत्कृतः।

तन्मे सर्वमिवैन्द्रजालिकमभूद्देव्या च दृष्टं पुनः
स्वप्नोऽभूत् सुखसम्भवे विधिवशाद्दुःखे च साक्षात्क्रिया ॥२८॥

देवी। महाराम्र ! तुण्हीं भविम्र किं तक्केसि ? । (ष)

राजा। न किञ्चिदन्यत्, किन्तु भवत्या वाणीविन्यासकौशलमेव केवलं तर्कयामि ।

देवी। महाराम्र ! तुह सरोइणी भोदु, भवं वा सरोइणीए, तदो ण मे असुहं, किन्तु लोअणे अङ्गुलीं अप्पिअ जा करेसि ता ज्जेव असुहं । (स)

विदू। जानामि भोदि ? जाणामि, वअस्सेण केवलं णाम किदं सरोइणीए तदो ज्जेव तुम्हेहिं विससल्लताड़िदाहिं विअ केसरिणीहिं उम्मत्तं, जइ लाहो भवे तदो । (ह)

इति राजानं प्रति मुष्टिं दर्शयति ।

चप। ब्बह्मण ! तुमं दाव तूण्हीं होहि । (क)

विदू। भोदि ! अहं उण ब्बह्मणो मज्झत्थत्तणं करेमि, ता सुणु, जइ सरोइणीं पेक्खअन्तेण विअ बअस्सेण पलविदं तुमं यड़ि वि तादिसं करीअदु, तदो तुमं पसण्णा होहि । (ख)

(ष) महाराज ! तूष्णीम्भूत्वा किं तर्कयसि ? ।

(स) महाराज ! तव सरोजिनी भवतु, भवान् वा सरोजिन्याः, ततो न मे असुखं, किन्तु लोचने अङ्गुलीम् अर्पयित्वा यत् करोषि तदेव असुखम् ।

(ह) जानामि भवति ! जानामि, वयस्येन केवल नाम कृतं सरोजिन्याः तत एव युष्माभिः विषशल्यताड़िताभिरिव केसरिणीभिरुन्मत्तं, यदि लाभो भवेत्, ततः ।

(क) ब्राह्मण ! त्वं तावत्तूष्णीं भव ।

राजा। स्वगतम्। देवीदूषणमयुक्तं मे। येन हि सापत्न्यं नाम सीमन्तिनीनामनार्य्योविषविस्रष्टम् अतत्रूपञ्च महाविषम्। यतः—

यदा कान्तो रक्तामनुसरति काञ्चित् प्रियतमां
तदन्या निर्वर्ण्य प्रभवति तदैवातिमलिना।
प्रतीचीव प्राचीं दिनकरकरामर्षिततनुं
स्वतुल्यानां कश्चिन्न खलु सहते स्वाधिकसुखम्॥ २८॥

हन्त! विपदियं मे महती समासन्ना। तथाच—हृदयापहारिणी सरोजिनी, प्रमोदहारिणी देवी, शरीरशोषिणी चिन्ता, अवशकारिणी भार्य्याधीनता, सत्यवादितानाशिनी च स्वप्रवाणी। अपिच हृदये उत्कण्ठा देवीभयञ्च, नयने सरोजिनीरूपम् अश्रु च, श्रवणे सरोजिनीगानं देवीतर्जनञ्च, शरीरे रोमाञ्चजालम् अस्वास्थ्यञ्च परिलक्ष्यत इति।

देवी। अज्जउत्त! दिणणाधो हि पआसं ज्जेव एक्कपोक्करिणीए पहूदाइं कमलाइं उप्फुल्लाइं करेदि, तेण ण ताणं अण्णोण्णं भोदि मच्छरो, ता जइ तुमं मं विस्सविअ सरोइणीकामुओ भवे, तदो वरणसूप्पेण तां। (ग) इति अङ्गुलीचलनं नाटयति।

(ख) भवति! अहं पुनर्ब्राह्मणो मध्यस्थत्वं करोमि, तत् शृणु, यथा सरोजिनीं प्रेमसमावेशेनैव वयस्येन प्रलपितं, त्वां प्रत्यपि तादृशं क्रियतां, ततस्त्वं प्रसन्ना भव।

(ग) आर्य्यपुत्र! दिननाथो हि प्रकाशमेव एकपुष्करिण्याः प्रभूतानि कमलानि उत्फुल्लानि करोति, तेन न तेषाम् अन्योन्यं भवति मत्सरः, तद् यदि त्वं मां विश्वास्य सरोजिनीकामुको भवेः, तदा वरणशूर्पेण ताम्—

विदू। स्वगतम्। अणुणयं वि जाणादि देई ?। (घ)

राजा। आत्मगतम्। अहो! विचित्रं नाम चरित्रं ललनानाम्। तथाहि—

नहि भवति विलम्बः केशपाशं ग्रहीतुं
न सपदि पतितुं वा पादयोरेककाले।
शिरसि पतति दृष्टिः प्राक्, परं पादयोश्च
जगति हि तरलानामेष एव स्वभावः॥ ३०॥

प्रकाशं। प्रिये! स्वप्नप्रलापविशकलितविश्वासेन मनसा नार्हसि विद्वेष्टुं विलपितुं वा। ननु कथयतु, भवतीमेव पृच्छामि, यदि स्वप्ने समधिरूढगजेन्द्रः सुरेन्द्रोऽहं गच्छामि सत्यलोकमिति प्रालपम्, तदा किन्नु भवती वैधव्यमाश्रयेत ?।

देवी। तादिसो हि सिविणो अह्मे हिं पच्चक्खीकिद सिविणादो विसदिसो। (ङ)

चप। भट्टिणि! गेह्णदु महाराओ सरोइणीं तेण का हाणी भोदिए ?। (च)

विदू। चवलिए! उजुअबुद्धिआ तुमं सि, ता सुणु, सामिजुअलस्स अहिआरवासी पआजणो कस्सव्वि करं ण देदित्ति सामी एक्कस्स अत्तणो ज्जेव अहिआरे पआं रक्खिदुं इच्छदि त्ति। (छ)

(घ) अनुनयमपि जानाति देवी ?।

(ङ) तादृशो हि स्वप्नः अस्माभिः प्रत्यक्षीकृतस्वप्नात् विसदृशः।

(च) भर्त्रि! गृह्णातु महाराजः सरोजिनीं तेन का हानिर्भवत्याः ?।

देवी। हला चवलिए! दाणिं जाव अस्सकज्जाइं उज्झिअ जा परिचज्जा किदा, ताए फलस्स, संसारसुहस्स, जीविदप्पओअणस्स अ हाणी। (ज)

राजा। देवि! न खलु भविता भवत्याः कस्यचिदपि हानिः। येन हि मम—

प्रथमा त्वयि प्रियतमे! प्रियता
नहि सा विनङ्क्ष्यति परेऽपि गता।
अपरं तरुं स्वशिरसाश्रयति
व्रततिर्न तु त्यजति मूलमपि ॥ २१ ॥

देवी। सुणिदं तुए चवलिए! अवस्सं ज्जेव अस्स परजणे पिअदा गमिस्सदि त्ति इमिणा सद्दाविदं, ता अम्हाणं किं इमेहिं वावारेहिं एहि गच्छम्ह। (झ)

इति चपलिकामल्लिकाभ्यां सह निष्क्रान्ता।

राजा। देवि! प्रसीद, परिहाय च परिजनानुनयम् उत्क्षिप्य च प्रणयपाशम्, प्रदाय च समुद्वेगोपहारम्, निर्माय च लोचन-

---

(छ) चपलिके! ऋजुकबुद्धिका त्वमसि, तत् शृणु, स्वामियुगलस्य अधिकारवासी प्रजाजनः कस्यापि करं न ददातीति स्वामी एकस्य आत्मन एव अधिकारे प्रजां रक्षितुमिच्छतीति।

(ज) हला चपलिके! इदानीं यावत् अन्यकार्य्याणि उज्झित्वा यत् परिचर्य्या कृता, तस्याः फलस्य, संसारसुखस्य, जीवितप्रयोजनस्य च हानिः।

(झ) श्रुतं त्वया चपलिके! अवश्यमेवास्य परजने प्रियता गमिष्यति इत्यनेन शब्दितं, तदस्माकं किमेभिर्व्यापारैः एहि गच्छावः।

सलिलं, विस्मृतचिरानुरागा दर्शितनवविरागा जनितविषम-वियोगा, चपलेव चपलगमना, श्रमायामिनीव मलिनमुखी, वाराणसीगङ्गेव दक्षिणविमुखी किमर्थं चलितासि ?।

नेपथ्ये। तुमं ज्जेव भिस्सलिङ्गश्रो ईदिसो। (ञ)

विदू। वश्रस्स! पीदरसा खज्जुरिश्रा विश्र एसा गच्छदु, अण्णाम्मिट्ठउव्वां पहादे सूज्जो विश्र सरोइणीं गेह्न। (ट)

राजा। मूर्ख! त्वमसि मे कथमभिज्ञः क्लेशस्य ?। न खलु परः परक्लेशमवगच्छति।

नेपथ्ये देवी गायति।

भ्रान्तहृदय! त्यज विषयवासनां
क्लान्त! कुरु विषय क्षणिक भावनाम्।
ऋतुराजो वसन्त आसीदशोकहेतुः
साम्प्रतमपरागतो ददाति यन्त्रणाम्॥

राजा। आकर्ण्य। वयस्य! सत्यमस्मि साम्प्रतमाकुलतमः ? यतः—

सरोजिनीप्रणयपरीप्सु मे मनः
चिरप्रियाप्रणय इतोऽनुकर्षति।
उपस्थिलिं सरसि रसं सरोरुहः
पिपासुकं कुमुदरसस्मृतिर्यथा॥ ३२॥

(ञ) त्वमेव भिन्नलिङ्ग ... दृशः।

(ट) वयस्य! पीतरसा खर्जूरिकेव एषा गच्छतु, अन्यथाऽदृष्टपूर्वां प्रभाते सूर्य्य इव सरोजिनीं गृहाण।

सचिन्तम्। सखे ! परिहाय च तवान्तिकम्, उपेत्य च विश्राम-मन्दिरं, निद्राय च सहसा किं प्रालपं, किंवा समाचरं, न खलु तत् सम्प्रति स्मरामि। किन्तु अद्य सरोजिनीमवलोकितवानिव शयनसौधे।

विदू। सहासम्। इदो परं सव्वं ज्जेव सरोइणीमअं पेक्खिस्ससि। (ठ)

राजा। न खलु वयस्य ! सत्यमेवाद्य कृतार्थोऽस्मि सरोजिनीं पश्यन्।

विदू। तह वि दाणिं तुमं अकिदत्थो, जेण पढ़मं णेत्त-संजोओ, तदो हिअअसंजोओ, अज्ज तु सोहसंजोओ, जह उण वक्खोसंजोओ हुविस्सदि, तह तुमं किदत्थो। (ड)

राजा। सखे ! नूनमद्य स्वप्ने प्रलपितं मया, येन हि देवी विरक्ता।

विदू। परिच्चत्तं तुए धीरत्तणं, जेण हलिजोइदस्स विअ बिसहस्स तुह केवलं वट्टदि एक्कचिन्ता। (ढ)

राजा। माधव ! महीयान् खलु धैर्य्यलोपी विरहमहिमा, दुःसहश्च तरुणानाम्। अपिच—

(ठ) इतः परं सर्व्वमेव सरोजिनीमयं प्रेक्षिष्यसे।

(ड) तथापि इदानीं त्वमकृतार्थः, येन प्रथमं नेत्रसंयोगः ततो हृदयसंयोगः, अद्य तु सौधसंयोगः, यथा पुनः वक्षःसंयोगो भविष्यति, तथा त्वं कृतार्थः।

(ढ) परित्यक्तं त्वया धीरत्वं, येन हलियोजितस्य इव वृषभस्य तव केवलं वर्त्तते एकचिन्ता।

प्रकृतिजमपि धैर्य्यं विप्रयोगो भिनत्ति
यदिति तदुपसर्गस्यात्मनो हि स्वभावः।
गणगत-युजिधातुर्योगमर्थं व्यनक्ति
गमयति खलु तस्य व्यस्तमर्थं विशब्दः॥ २२॥

विदू। णं पुच्छेमि, सच्चं तुए सअणसोहे सरोइणी पेक्खिदा?। (ण)

राजा। किं ब्रवीमि? सैव लावण्यमयी मूर्त्तिः, स एव हासः, तदेव सरलावलोकनं कथं सरोजिनी नेति प्रतीतिः।

विदू। तहिं कधं परिच्चत्ता?। (त)

राजा। तत्र खलु देवीपरिचारिकेरितां गिरमाकर्ण्य प्रदीपशिखेव तस्मिन्नेवान्तर्हिता।

विदू। तहिं क्खु तुह देई सुहावड़ीए मुहपिहाणिआ सम्बुत्ता। (थ)

राजा। अहो! सा खलु मे विरोधिनी संवृत्ता। येन हि अबलापि स्वाधीना, भीरुरपि महाराजविद्रोहिणी, दक्षिणानुगतापि वामा, मनुष्यकन्यापि महिषी, वरवर्णिन्यपि विवरवर्णिनी, गृहस्थापि दण्डधारिणी, सजलनयनापि रुक्षदृष्टिः, पतिविदूषिकापि विदूषकविद्वेषिणी। हन्त भोः सरोजिनीलाभे क्वचा मनसि महानन्दः, नयने लावण्यमयी स्वर्गीयमूर्त्तिः, कर्णे

(ण) ननु पृच्छामि, सत्यं त्वया शयनसौधे सरोजिनी प्रेक्षिता?।

(त) तर्हि कथं परित्यक्ता?।

(थ) तर्हि खलु तव देवी सुधाघस्या मुखपिधानिका संवृत्ता।

मधुमिश्रितं भ्रमरगुञ्जितम्, अधरे मधुराधरसुधा, वक्षसि च कमलकोमलं कलेवरं, क्व वा देवीतर्ज्जने मनसि विषादः, नयने सत्रासदृष्टिः, कर्णे केसरिणीगर्ज्जनम्, अधरे मालिन्यं वक्षसि च महती कम्पा । तेन हि ममाशालता फलोन्मुखी जाता, प्रायेण देवी च तस्याः कर्त्तरिका ।

विदू । सरोइणी आअदा वा सिविणप्पहावो बत्ति संसओ ज्जेव मे ण णस्सदि, जेण हि जइ सरोइणी आअदा, तह देवीए पेक्खिअ किं ण संजमिदा ? । (ट)

राजा । अये ! नैनमर्थमवगच्छन्ति भवादृशाः । पश्य—

अन्यैर्जनैरविदिता प्रविवेश याऽस्मिन्
तां बद्धुमर्हति कथं प्रकृतैव देवी ? ।
या चेतनेत्यजनने, मरणे च याति
योगी जनोऽपि नहि पश्यति कुत्रचित्ताम् ॥ २४ ॥

स्वगतम् । अहो ! चपले खल्वस्मिन् ब्राह्मणकुमारे वचनगोपनं मे वायसस्य भोजनीयगोपनमिव स्वस्यैव केवलमप्रत्ययाय । भवतु, एवं तावत् । प्रकाशम् । सखे ! देवीवशलापन्नतया खल्वहमपुरुषोऽस्मि संवृत्तः । पश्य—

कन्या सा स्वयमेव मे गृहमगादन्तःपुरे किन्त्वहं
सा दूरं निशि निर्भया गतवती, भूतोऽस्मि देव्या अहम् ।

(ट) सरोजिनी आगता वा स्वप्नप्रभावो वेति संशय एव मे न नश्यति, येन हि यदि सरोजिनी आगता, तदा देव्या प्रेक्ष्य किं न संयमिता ।

सा मां पश्यति सस्मितं, परजनाशङ्की स्थितोऽहं पुन-
रप्राणापहर: सदा तनुभृतां मृत्यु: पराधीनता ॥ २५ ॥

वयस्य ! तदमुष्मिन् शेषरात्रे त्वमित: शिक्षितां ललितललनामिव लोचनचुम्बिनीं निद्रां भजस्व, अहमपि तावत् देवीं प्रसादयामि ।

विदू। बअस्स ! पसादणं कादुं अवसादणं मा करेहि। (ध)

इति निष्क्रान्त: ।

राजा। हन्त ! किमत्र विधेयम् ? देवीविसर्ज्जने गृहशून्यता, देवीरक्षणे पुनरधिवास: सरोजिनीविरहस्य, क्व सरोजिनीत्यन्वेषणे उन्मत्तताप्रतीति:, सरोजिनीलालसात्यागे जीवनविफलता, सरोजिनीस्पृहायाञ्च सततस्त्रीमूर्त्तिचिन्ता, उभयपरित्यागे च गृहत्याग एव युक्त:, किन्तु तथापि इदमत्रावधेयं,—सरोजिनीमनन्विष्यन्नपि मन्मथेनैवोन्मत्तीभवेयं, तन्मे सरोजिनीमन्विष्यत एव उन्मत्तीभाव: श्रेयान् । किन्तु—

अन्वेषणीयैव तथा सरोजिनी
यथा परो वेत्ति न वित्तमोऽपि सन् ।
येषां प्रवर्द्धेत यशश्च कर्म्मभि:
कार्य्यञ्च सिध्येत त एव पण्डिता: ॥ २६ ॥

इति निष्क्रान्त: ।

द्वितीयोऽङ्क: ।

(ध) वयस्य ! प्रसादनं कर्त्तुम् अवसादनं मा कुरु ।

तृतीयोऽङ्कः ।

—∞ॐ∞—

ततः प्रविशति राजपण्डितः शान्तदेवोपाध्यायः

सम्भवतश्च शिष्यवर्गः ।

शान्त । अयि विवेकविहीनहृदय ! किमनया विषविषमया विषयवासनया ?

एकोऽपि कार्य्यवशतो विविधं स्वरूपं

यो नाटकाभिनयकृज्जनवद्बिभर्त्ति ।

एकैकशो रविरिव प्रतितोयभाण्डे

यो भाति सर्वविषयेषु च तं स्मर त्वम् ॥ १ ॥

शिष्य । उपाध्याय ! कं नाम तमवगच्छामः ? ।

शान्त । वत्स ! ब्रह्मेति वेदान्तिनः, नित्य-शुद्ध-बुद्ध-मुक्त-स्वभाव इति सांख्याः, महेश्वराद्यन्यतम इति पातञ्जलाः, मन्त्रमय इति मीमांसकाः, परमात्मेति नैयायिका वैशेषिकाश्च, सर्वज्ञ इति बौद्धाः, लोकाचारसिद्ध इति चार्वाकाः, नारायण इति स्मार्त्ताः, हिरण्यगर्भ इति पौराणिकाः, शब्द इति वैयाकरणाः, शक्तिरिति शाक्ताः, विष्णुरिति वैष्णवाः, शिव इति शैवाः, सूर्य्य इति सौराः, गणेश इति गाणपत्याः, गॉड् इति म्लेच्छाः, रहिम इति यवनाः, अन्येऽपि बहवः सम्प्रदाया अपरनामानमीश्वरमामनन्ति ।

शिष्यः । तर्हि मादृशाः, किं नामानमीश्वरमुपासीरन् ? ।

शान्त । वत्स ! श्रुतिनाथ !

एकं हि वस्तु स्थितमैन्द्रजालिकं
यथा जनः पश्यति भिन्ननामकम् ।
एकं तथैवेश्वरमत्र मानवः
भिन्नाभिधं वक्ति समाजभेदतः ॥ २ ॥

तत् किल निजवंशपरम्पराप्राप्त एवेश्वरः समुपासनीयः ।

अपरः शिष्यः । उवज्झाअ ! अहं क्खु सत्थं पढ़िदुं वावारिदो म्हि जणएण, ता किं पढ़मं पढ़िदव्वं ? । (क)

शान्त । वत्स ! सुशीलोऽसि नूतनवयाश्च तत् प्रथममिदमवधातव्यम् ।

वेदे सुन्दरमन्दिरे स्थितिमतां मोचार्थनिर्देशिनि
द्वारं व्याकरणं, पुराणममलो दीपः, प्रकोष्ठः स्मृतिः ।
स्तम्भाश्चास्तिकदर्शनानि, रसवत् काव्यञ्च नव्या वधू-
श्चार्वाकं स्वरु, रन्दुरुर्जिनमतं,-ज्योतिः कपाटं स्मृतम् ॥३॥

तत् किल शब्दशास्त्रमेव प्रथममध्येतव्यम् ।

ततः प्रविशति कटिदेशे वरणशूर्पमादाय विदूषकः ।

विदू । विलोक्य । हंहो ! तिणखाअणेण परितित्तो बिअ बिड्डो बिसहो मुहं चालअन्तो चिट्ठदि उवज्झाओ सन्तदेवो, ता णं उवसप्पिअ पुच्छेमि । उपसृत्य । ओसरध अप्पपण्डिदाओ ! ओसरध । (ख)

(क) उपाध्याय ! अहं खलु शास्त्रं पठितुं व्यापारितोऽस्मि जनकेन, तत् किं प्रथमं पठितव्यम् ? ।

(ख) हंहो ! तृणखादनेन परितृप्तः इव घस्मरो वृषभः मुखं चालयन् तिष्ठति उपाध्यायः शाक्तदेवः, तदेनमुपसृत्य पृच्छामि । अपसरत अल्पपण्डिताः । अपसरत ।

श्रुति। माधव! अपि कुशलमुदरेण सह भवतः ?।

विदू। हंहो अप्पपण्डिद! उदरस्स कुसलं किं पुच्छसि ? जेण चउद्दसवारमेत्तभोअणेण पादुआए विअ उदरस्स चम्ममेत्तं अवसिट्ठं, तदो मह वि अउसलं आपडिदं। (ग)

श्रुति। (विहस्य) अये! धर्म्मशास्त्रे खलु वारद्वयाधिकं भोजनं निषिद्धमस्ति, तत्कथं चतुर्द्दशवारभोजनम् ?।

विदू। हंहो अप्पपण्डिद! एरिसस्स रस्सो अहिआरे ण वसामि, जेण चउद्दसवारं ज्जेव अस्सं लहामि। किन्तु कहिं वि लड्डुअं, कहिं वि सक्करां, कहिं वि मोदअं खाएमि। भोदु, ओसर अप्पपण्डिद! ओसर। इत्युपाध्यायमुपसर्पति। (घ)

शान्त। विलोक्य। माधव! वैवाहिकशूर्पवहने किं प्रयोजनम् ?।

विदू। उवज्झाअ! तुम्हे केवलं कुदो णिमन्तणपत्तं आअदं, कहिं वा हुविस्सदि त्ति चिन्तेध, इदो जा महाराओ उम्मत्तीभूदो, देई वि महाराअघरे पोक्करिणीं खणादि त्ति ण पेक्खध। (ङ)

(ग) हंहो! अल्पपण्डित! उदरस्य कुशलं किं पृच्छसि ? येन चतुर्द्दशवारमात्रभोजनेन पादुकाया इव उदरस्य चर्म्ममात्रमवशिष्टं, ततो ममापि अकुशलमापतितम्।

(घ) हंहो अल्पपण्डित! ईदृशस्य राज्ञोऽधिकारे न वसामि, येन चतुर्द्दशवारमेव अन्नं लभे। किन्तु कस्मिन्नपि लड्डुकं, कस्मिन्नपि शर्करां, कस्मिन्नपि मोदकं खादामि। भवतु अपसर अल्पपण्डित! अपसर।

शान्त । अये ! प्रकृतमिदानीमभिधीयताम् ।

विदू । उवज्झाअ ! तत्थभअदा महाराएण कहिं वि वाराणसीणअरे सरोइणीत्ति गन्धव्वकसआ पेक्खिदा, राअसहाबसुलहेण कामेण अहिलसिदा अ परिणेदुं, देई तु विरोहिणी जाणिअ सव्वं ज्जेव पउरमहिलाअणं तां वरीदुं णिवारेदि त्ति । (च)

शान्त । तर्हि किमिति भवान् शूर्पधरः संवृत्तः ? ।

विदू । तुह सआसादो ववत्थां गहीदुं, णं कधेहि, अहं इत्थिआ भविअ इमिणा सूप्पेण महाराअपरिणीदां सरोइणीं वरीदुं सक्कणोमि णवत्ति, जेण देईणिसिद्धो णावरो महिलाअणो आगमिस्सदि त्ति । (छ)

शान्त । सहासम् । अये ! किमिति प्रष्टुं नापरं पण्डितमवाप्तवानसि ? ।

(ङ) उपाध्याय ! यूयं केवलं कुतो निमन्त्रणपत्रमागतं, कश्चिन् वा भविष्यतीति चिन्तयत, इतो यत् महाराज उन्मत्तीभूतः, देव्यपि महाराजगृहे पुष्करिणीं खनतीति न प्रेक्षध्वे ।

(च) उपाध्याय ! तत्रभवता महाराजेन कस्मिन्नपि वाराणसीनगरे सरोजिनीति गन्धर्वकन्यका प्रेक्षिता, राजस्वभावसुलभेन कामेन अभिलषिता च परिणेतुं, देवी तु विरोधिनी ज्ञात्वा सर्वमेव पौरमहिलाजनं तां वरीतुं निवारयतीति ।

(छ) तव सकाशात् व्यवस्थां ग्रहीतुं, ननु कथय, अहं स्त्रीभूत्वा अनेन शूर्पेण महाराजपरिणीतां सरोजिनीं वरीतुं शक्नोमि नवेति येन देवीनिषिद्धो नापरो महिलाजन आगमिष्यतीति ।

विदू। सच्चं उवज्झाअ! मए क्खु सव्वं ज्जेव उक्कोअ मन्दिरं परिमग्गिअ वि णावरो धम्मसत्तपण्डिदो लद्धो। (ञ)

शान्त। धिङ् मूर्ख! पण्डिताः किमुत्कोचहराः?।

विदू। कोवि कोवि। (झ)

शान्त। अये! समासन्नासु जीवनविपत्सु पापमपि केचिदङ्गीकुर्वन्ति। येन हि सम्प्रति दुष्करा समुपस्थिता सुधीजनानां जीवनयात्रा। तथा च—

चुल्लीं वह्नियुतां विधाय वनिता म्लानानना ध्यायति
बाला भोजनभाजनं निदधतः पश्यन्ति मातुर्मुखम्।
विप्रं दासमुरीकरोति न जनो, नास्ति प्रभूणां दया
नष्टं देहबलं, गृहेऽपि न धनं कः स्यादुपायस्तदा ॥ ४ ॥

अपिच—

बाल्ये वेतसताडनं, प्रियतमात्रिश्लेषणं यौवने,
प्रौढ़े भ्रूकुटिदर्शनञ्च धनिनां पाश्चात्यशिक्षावताम्।
वार्द्धक्ये पठितुं शिशोर्गतवतो विच्छेदजा यन्त्रणा
सर्वक्लेशनिदर्शनार्थमसृजज्जातिं बुधानां विधिः ॥ ५ ॥

सविषादम्। अहो बत! दिने दिने मन्दभाग्यतया खल्वार्य्यजातीनां चिरन्तनं सकलमेव लुप्तप्रायम्। तथाहि सम्प्रति पाश्चात्यशिक्षाव्रतिनां युगान्तरप्रवर्त्तकानामिव नूतनधनिनाम्—

(ञ) सत्यम्, उपाध्याय! मया खलु सर्वमेव उत्कोचमन्दिरं परिमार्ग्यापि नापरो धर्मशास्त्रपण्डितो लब्धः।

(झ) कोऽपि कोऽपि।

गाढ़ा भक्तिर्विसदृशजने, देवतायां विरक्ति-
र्नामावल्यां भ्रुकुटिरचना, वर्म्मसु प्रेमदृष्टिः।
हित्वा देवादृतनवरसामाध्विभाषां सुधावत्
आस्ते भाषास्वपसदृगणैश्चर्विताखु प्रवृत्तिः॥ ६॥

अपरः शिष्यः। उवज्झाअ! तहिं अह्मे मिच्चुम्बि अङ्गीकरिअ ण पढ़ह्म सत्थं। (ञ)

श्रुति। उपाध्याय! तदिमं नूतनसम्प्रदायमवगच्छतो मे बलवद्विषस्समन्तःकरणम्।

शान्त। वत्सौ! न खलु विचिकित्सितव्यं श्रीमद्भिः। येन हि—

लघूं वा हेयं वा स्मरतु वदतु प्राकृतजनो
विना वित्तं देहो भवतु च कृशः सीदतु मनः।
स्वधर्म्मार्थं तत्राप्युचितमधुना शास्त्रपठनं
जनान् पृष्ठप्रेक्षानपि शिशिरसूर्य्यस्त्यजति न॥ ७॥

विदू। उवज्झाअ! उवज्झाअ! एसा किं तुह्माणं बवत्था? ता तुमं चिट्ठ, अहं जामि। अहं मणू, अहं विस्सामित्तो, अहं जस्सवक्को, अहं जं करेमि तं सत्थं, ता अहं इत्थिआ भविअ सरोइणीं वरइस्सं। (ट)

इति विविधभङ्ग्या निष्क्रान्तः।

(ञ) उपाध्याय! तर्हि खलु वयं मृत्युमपि अङ्गीकृत्य न पठामः शास्त्रम्।

(ट) उपाध्याय! उपाध्याय! एषा किं युष्माकं व्यवस्था?। तत् त्वं तिष्ठ, अहं यामि, अहं मनुः, अहं विश्वामित्रः, अहं याज्ञवल्क्यः, अहं यत् करोमि तत् शास्त्रं, तदहं स्त्रीभूत्वा सरोजिनीं वरिष्यामि।

शान्त । विलोक्य । अहो ! वैधेयनिर्गमेन शान्तिमापन्नाः स्मः । ननु वत्सौ ! पश्यतं खलु सूरो दूरमधिरूढो गगनस्य, तन्मध्यन्दिनमापतितम् आह्निकसमयश्चेति गच्छामः ।

श्रुति । यदाज्ञापयत्युपाध्यायः ।

इति निष्क्रान्ताः सर्वे ।

विष्कम्भकः ।

ततः प्रविशति सचिन्तः सुबाहुः ।

सुबाहुः । अहो ! यथार्थेयं किल लोकधारणा, यत् साधारणी खलु गङ्गा सती च रमणीति । येन हि—

हिमशिखरिशिखान्ताज्जाह्नवी सन्निपत्य
पथि जलधिमलब्ध्वाऽप्यन्यसिन्धुं न याति ।
दयितमलभमाना नापरं सत्यपि स्त्री
भुवि कथमथवा स्यात् पावनी स्पर्शमात्रम् ॥ ८ ॥

अये मूढहृदय ! त्वं खलु प्रियया विप्रलभ्यसे, मनोरथेन विडम्ब्यसे, मादृशा परेण परिहस्यसे, सरोजिन्या च प्रत्याख्यायसे, तथापि न ते निवृत्तिरस्ति, न वा विषादः, तन्मन्ये वराहशिचिता तवेयं गतिः । तर्ज्जनीमुत्तोल्य । अये खलशिरोमणे ! मीनकेतन ! अपराधिनि मयि किमिति निरन्तरमेव प्रकटयसि प्रहारपाटवम् ? । अथवा युक्तमेतत् । यतः—

अहं किल क्लेशकरोऽस्मि दानवः
भवान् पुनर्देवगणेषु गण्यते ।

विरोधिता तेन हि नः पुरातनी
न शत्रुता जातिकृता प्रशाम्यति ॥ ८ ॥

कृताञ्जलिः। हे अलौकिकयोधकुशल! प्रद्युम्न! स्तौमि भवन्तं, शतमपि प्रहर मां, किन्तु सरोजिनीमपि लक्षय। भवतु, अद्य प्राणानपि पणीकृत्य सरोजिनीग्रहणे प्रवर्त्तिष्ये। इति किञ्चिदन्तरालं गच्छति।

नेपथ्ये गायति।

देवी मम मनोरथपूरणे वैरिणी जाता
दिने दिने आशालता क्रमशो विलयं गता।
मनसि मनसि योगः देहयोः पुनर्वियोगः
भवति न सुखभोगः कामिन विकलीकृता ॥

ततः प्रविशति भयचकिता सरोजिनी।

सगे। अहो! सुसदृशी खलु वृत्तिः प्रबले स्रोतसि निपतितानां वेतसानां स्त्रीजितानाञ्च पुरुषाणाम्। तथाच—

अबलापि बलेन यं जनं
स्ववशं वेशयते निरन्तरम्।
भविता यदि सोऽपि पूरुषः
सुतरां हन्त! हता स्वतन्त्रता ॥ १० ॥

सम्प्रति तु। मालवेशीत्यादिकं पुनः पठति। यत् किल मन्ये, तस्य रूपप्रवाहे सर्व्वाः खलु प्लवन्ते युवतय इति। समन्तादवलोक्य परिक्रामति।

सुबाहुः । सरोजिनीं विलोक्य सोल्लासम् । हन्त भोः ! समुपस्थितेयं चिन्तामात्रप्रमोहकारिणी विषादवैरिणी कामिनीमूर्त्तिः । अहो ! निर्म्माणनैपुण्यं विधेः । तथाच—

ऊरू स्तम्भौ, विरलविरला लोममाला च भित्तिः,
द्वारं दृष्टिः, निधिरपि कुचश्छादनं केशपाशः ।
दीपो वक्त्रं, नयनकुसुमे भ्रूलते तोरणे च
वामानाम्नी रतिसहचरस्योत्तमाऽट्टालिकेयम् ॥ ११ ॥

अहो ! कविभावनापि सम्यगिमामक्षमा वर्णयितुम् । तस्मादृशस्तावदेतावन्मन्यते, यत् उदयमानः पूर्णिमाचन्द्रमाः, मकरन्दपूर्णञ्च नवारविन्दं, इयञ्च कामिनीमूर्त्तिः, हरणार्थं त्रितयमिदं विधिनिर्म्मितं, तत्र प्रथमस्तिमिरहरणे, द्वितीयं भ्रमरपिपासाहरणे तृतीया च धैर्य्यहरणे यूनाम् । कथञ्चिदुपसृत्य । अयि प्रियतमे ! सरोजिनि ! चिरादपि मे दृष्टिपथं गतासि, तत् परिषिञ्च मे वचनामृतेन मदनानलशोषितं मनः ।

सरो । भयेन कम्पते ।

सुबाहुः । विलोक्य । अयि गन्धर्वराजनन्दिनि ! किं नाम ते भयकारणम् ? प्रतिपादय तावदात्मनः स्थैर्य्यम्, अथवा युक्तं खल्विदम् । यतः—

तृष्णार्त्ते मधुपे प्राप्ते कम्पते च सरोजिनी ।
स चापि चिरविश्वासात् पतन् पिबति तन्मधु ॥ १२ ॥

सखी । समन्तादवलोकयति ।

सुबाहुः अयि विलासिनि! किमिति विफलं दिशं विलोकयसे? न खलु ते किमपि भयकारणमस्ति। पश्य—

दानवेषु राजत्वं सुश्रीकेषु च नास्ति मे द्वितीयः।
प्रियतमे किमतःपरं लिप्सनीयमस्ति कुमारीणाम् ॥१३॥

सरो। मुखमवनमय्य। ण क्खु साहुजणो परकलत्तं अहिलसदि। (क)

सुबाहुः। हन्त गन्धर्वकन्ये! यां खलु भवतीमात्मनोऽप्यात्मीयतमां मन्ये, कथं सा परकलत्रमिति?।

सरो। ण क्खु हरिदस्सदो अस्सो मह अत्तजणो। (ख)

सुबाहुः। विहस्य। अयि मुग्धे! इयमेव भवतीनां विवेकविहीनता। तथाच—

एकमेव दिवि यौवनं वयः
एकमेव च सुखं निवासिनाम्।
आमनन्ति किल नश्वरं सुखं
मर्त्यधामनि मनीषिणो नृणाम् ॥ १४ ॥

अधुना विवेचय दानवमानवयोः कतरस्ते साधीयानिति।

सरो। अधोमुखी। सदी इत्थिआ हि एकस्सिं अत्ताणं अप्पिअ अस्सस्सिं वीदराआ होदि। (ग)

(क) न खलु साधुजनः परकलत्रमभिलषति।

(ख) न खलु हरिदश्वतः अन्यो मम आत्मजनः।

(ग) सती स्त्री हि एकस्मिन् आत्मानम् अर्पयित्वा अन्यस्मिन् वीतरागा भवति।

सुबाहुः। मरीचिनीं विलोक्यात्मगतम्। अहो! अस्याः खलु नयन-भावेन प्रत्याख्यानवचोऽपि मे मनोहरम्। अपिच—

सुगन्धिमुखपङ्कजे स्फुरति तीव्रमप्यक्षरं
विशालपुलकावली लसति देहवल्ल्यामपि।
किमद्भुतमिदं चिरस्मरणमद्य पश्याम्यह-
मियं किमुत वा भवेदभिनवावलानां गतिः॥ १५॥

प्रकाशम्।

प्रार्थकः स्वयमुपागतः प्रिये!
तं विहाय कथमन्यमिच्छसि?।
अन्तिकस्थमपहाय पादपं
दूरगं किमु लतावलम्बते?॥ १६॥

मरी। अत्ता ज्जेव मह णत्थि। इति स्तोकं स्तोकं चलति। (घ)

सुबाहुः। सखेदम्। अयि सरलबालिके! उपसंहर चरणसञ्चारणं, परिवर्त्तय हृदयावेगं, शिथिलय हरिदश्वानुरागं, प्रदेहि किङ्करे प्रणयप्रतिवचनं, वितर तृषातुरे सरसकटाक्षवर्षं, निष्ठुरतमे! प्रस्थितायां खलु त्वयि त्वदेकशरणं नूनमेनं जनं निहनिष्यति चिरविपक्षो मनोभवः।

मरी। सभयं चलत्येव।

सुबाहुः। चरणौ प्रणिपत्य। गन्धर्वराजनन्दिनि! पश्य त्वदर्थमेव विशीर्णमिदं मे कलेवरम्, उत्सन्नप्रायञ्च जीवनं, तन्मयि शरणापन्ने भवतु भवती करुणापरायणा। येन हि आश्रितेषु दया,

(घ) आत्मैव मम नास्ति।

साधुषु सौहार्दं, प्रणयिषु प्रेमिकता, इमानि किल महतां लक्षणानि।

सखी। अपरां दिशमवलोक्य। अहह्मि बालिआ, ता कुदो मह्ह-त्तणं। (ङ)

सुबाहुः। निर्दयतमे! त्वदर्थमेवाहमस्मि पदे पदे प्रमत्तभाव-मापन्नः। यतः—

आस्ते मे नगरी, वधूश्च सुषमा, राज्यञ्च निष्कण्टकं
उत्फुल्लोपवनोपशोभिततटा वापी च सत्पङ्कजा।
शान्तः साधुसुधीजनः परिजनः, सेना च हस्त्यश्वभाक्
हित्वैतानि हसामि रोदिमि पुनर्नृत्यामि जल्पाम्यपि ॥१७॥

अपिच त्वदर्थमेव—

देहात् कान्ति,-र्विचलमनसः शान्तिरैकान्तिकी मे
नष्टा शक्तिः सततविकलादात्मनो देवता च।
तस्मिन् देहे भृशमलिनता, तन्मनस्याकुलत्वं
तस्मिन्नात्मन्यपि च भवती वर्त्तते दौर्बलञ्च ॥ १८ ॥

अन्यच्च—

स्वरे श्रोत्रं, नेत्रं तव निरुपमे रूपनिकरे
समालेख्ये पाणि--श्चरणयुगमन्वेषणविधौ।
समासक्तं चित्तं प्रणयनिगड़े, साम्प्रतमहं
त्वदर्थं जातोऽस्मि प्रणयिनि! विहीनेन्द्रिय इव ॥ १९ ॥

(ङ) अहमस्मि बालिका, तत्कुतो महत्त्वम्?।

सखी। स्वगतम्। किं एत्थ करणिज्जं ? अहह्मि एअलिआ अबला, दूरे बन्धुअणो, दाणवणिअडे अ णिप्फला खेअरगदी, ता सच्चं ज्जेव अज्ज समापड़िदो बिसमो समओ। अदो ज्जेव कधेन्ति पण्डिदाओ, जं जादीविसरिसं कम्म विसमं फलं उप्पाटेदि त्ति। मह तु पढ़मं बिसरिसं आअमणं, तदोवि एआइ-णीए। भोदु एत्थ जीवणं जाव मह णिब्बन्धो। प्रकाशम्। दाणव-राअ ! णिबित्तो होहि। (च)

सुबाहुः। लक्ष्यनिक्षिप्तसायकस्य विना विनाशं कुतो निवृत्तिः ?

सखी। इमिणा तुह णिन्दा बिवत्ती वा आवड़िस्सदि। (छ)

सुबाहुः। चतुरिके ! न खलु मादृशा निन्दां विपत्तिं वा गणयन्ति।

सखी। अदो ज्जेव विवज्जन्ति। (ज) इति किञ्चित् किञ्चित् चलति।

सुबाहुः। अपरिणामदर्शिनि ! गिरिषु शतसमीरणाहतिरिव अस्मासु का नाम विपत्तिः ?। तेन खलु इदमिदानीं भवत्या विवेचनीयं, यत् त्वमेकाकिनी तरुणी, अहञ्च दानवराज इति।

(च) किमत्र करणीयम् ? अहमस्मि एकलिका अबला, दूरे बन्धुजनः, दानवनिकटे च निष्फला खेचरगतिः, तत्सत्यमेव अद्य समापतितः विषमः समयः। अतएव कथयन्ति पण्डिताः, यत् जातिविसदृशं कर्म विषमं फलम् उत्पादयतीति। मम तु प्रथमं विसदृशमागमनं, ततोऽपि एकाकिन्याः। भवतु, अत्र जीवनं यावत् मम निर्बन्धः। दानवराज ! निवृत्तो भव।

(छ) अनेन तव निन्दा विपत्तिर्वा आपतिष्यति।

(ज) अतएव विपद्यन्ते।

सरो। भयाकुलापि सरोषम्। तुए वि एदं विवेअणिज्जं, जं एआइणीए तरुणीए ज्जेव दाणवो वावादीअदि त्ति। (झ)
इति द्रुतं कम्पमाना चलति।

सुबाहुः। द्रुतमुपसृत्य। गर्वपरवशे! न खलु भवत्याः कोपवचनमपि मे विरक्तिं जनयति, तदालप प्रियवचसा, निवर्त्तय च गतिम्। इत्यतिसन्निधानं गच्छति।

सरो। सरोषम्। दाणवाहम! मा परामिस मं। (ञ)

सुबाहुः। अये! विसदृशाचारिणि! मा विकत्थस्व।
इति ग्रहीतुमुपक्रमते।

सरो। सत्रासकम्पम्। णअरपालआ! परित्ताअध भीरुं। (ट)
इति मूर्च्छति।

नेपथ्ये। मा भैषीः।

सुबाहुः। किमेतत्?। इति साशङ्कं समन्तादवलोकयति।

ततः प्रविशति द्रुतं सशस्त्रो वीरसिंहः।

वीर। समन्ताद्विकटं विलोक्य? अरे! किमत्र पिण्डीभूतः कलिकालः? अथवा किमिदमराजकं राज्यम्? रक्षिशून्यं वा स्थानमात्रम्? निर्वीरं वा सेनामण्डलम्? नास्ति वा धर्म्मसञ्चारः? यदमी प्रादुर्भवन्ति पापात्मानः। सरोषं सुबाहुमवलोक्य। अरे! स एव न त्वमसि दानवाधमः सुबाहुः? निवर्त्तस्व पापात् निवर्त्तस्व पापात्।

(झ) त्वयाऽपि एतद्विवेचनीयं, यत् एकाकिन्या तरुण्यैव दानवो व्यापाद्यत इति।

(ञ) दानवाधम! मा परामृश माम्।

(ट) नगरपालकाः! परित्रायध्वं भीरुम्।

सुबाहुः । स्वगतम् । इदमुपस्थितमनवधानताफलं, यत् प्रसह्य-प्रवर्त्तनसमये अनुनयेन प्रवृत्तं मया, तदिदानीं सेनापतिमपराजित्य नास्ति मे मनोरथसिद्धिः । पराहृत्य सगर्वम् । अये ! दानवाः किं न धारयन्ति वीरदेहम् ? न वा स्वाधिकृतं राज्यं पालयन्ति ? अथवा त्वादृशान् वीरकीटानुपेक्षन्ते ? यत्त्वमीदृक् विकत्थसे ।

वीर । आः कदर्य्य ! निर्मर्य्याद ! कामयमानोऽपि जननीकल्पां राजरमणीं न लज्जसे मुखं दर्शयितुम् ? । अरे मूर्खतम ! जानासि न ?

मही पालपत्नी, गुरुस्त्री, स्वमाता,
सती स्त्री च साधारणी वा समाना ।
तदिच्छुं बलाद्देवपेयं पिपासुं
यथा सारमेयं तथा शिक्षयामि ॥ २० ॥

सुबाहुः । साट्टहासम् ! आः ! भवानेव जगति मनुर्याज्ञवल्क्यो वा, तद् यं कामपि शिक्षयितुं क्षमः । अरे ? यदियं मम रमणी अतएव राजरमणी ।

अजानतां हि मूर्खाणां शौण्डं शास्त्रार्थजल्पनम् ।
दृष्टञ्च वीरकीटानां वीरत्वं वाक्यमात्रतः ॥ २१ ॥

वीर । साक्रोशम् । आः पाप ! दानवापसद ! परकलत्रलम्पट ! त्वमेवाशरणामाक्रामसि बालिकां, वाक्यमात्रेण वीरत्वं नाम मम ? । यतः—

शूरः समाश्रितजनं रमणीं शिशुञ्च
नाक्रामति क्वचन पामर! धर्म्मभीरुः।
सिंहो हि धावति महाद्विरदं प्रमत्तं
गर्वात् पुनर्ग्रसति कीटशिशुन्तु भेकः॥ २२॥

सुबाहुः। अरे रे साधुम्मन्य! छद्मना सरोजिनीलालस! यदि पुनर्दृष्टान्तमात्रेण वीरत्वं, तदा खलु कवय एव वीराः, दीर्घ-ध्वनिरेव वा चेत् वीरत्ववीजं सन्ति किल जलदाः। यदि वा मन्यसे अभिनयमेव वीरत्वहेतुं, तदा रूपकाभिनेतार एव वीराः। अरे!

व्याजेनैव सरोजिनीं दनुसुतादेनां गृहीत्वाप्यहह-
मेषा ते किल कामना फलवती न स्यादभूमीरुहा।
माहात्म्येन गरुत्मता बलवता स्वर्गात् समासादिता
सौगन्धैः शलभाय मुग्धमतये कस्मै प्रदत्ता सुधा?॥२३॥

तदिदानीमप्युपदिशामि, यत् त्वमसहाय इत एव निवर्त्तस्व।

वीर। आः शास्त्रान्ध! किं ब्रवीषि? अहमप्यसहायोऽस्मि?।
धर्म्मः, साधुः समस्तः, क्षितिभृदपि पुनर्यस्य चैते सहायाः
तस्यान्यैः किं सहायैरनुपमबलिनः क्षुद्रकार्य्ये ममास्मिन्।
त्वामप्येकं ततोऽस्यां समरभुवि वृथागर्वितं पातयेयं
किं वा यत्नेन कश्चिद्विटपविदलने घोरनिस्त्रिंशपाणेः?॥२४॥

सुबाहुः। आः पाप! दुरात्मन्! वृथा विकत्थन! मानवकुल-कलङ्क! निश्वाससमीराः पर्वतस्य, श्रेणीकृतमण्डूकाः द्विपेन्द्रस्य,

विहङ्गसङ्घाश्च खगेन्द्रस्य किं कर्त्तुमर्हन्ति? तद्वीरकीटस्त्वं नार्हसि मां पदात् पदमपि चालयितुम्। ततो ब्रवीमि—

क्रोधज्योतिर्ज्वलति युधि चेद्दुर्ज्जयः सूर्य्यकल्पः
वह्नेर्वह्निर्भवति तु तदा दानवोऽयं सुबाहुः।
तस्मादस्माद्विरमकलहान्मूढ़! किंवोपदेशैः
प्रायेण स्यान्न खलु सुमतिर्जीवनापायकाले॥ २५॥

वीर। आः पाषण्ड! मण्डूककल्पजल्पन! अशक्यसाहस! क्रमश एव भृशं विकत्थसे?। तदिदानीमेव।

किं देवा, उत दानवाः, किमुत वा यक्षाश्च रक्षांसि वा
त्वत्पक्षं यदि पूरयन्ति, तदपि त्वां रक्षितुं न क्षमाः।
एष त्वां प्रणिहन्मि, योषितमिमां यच्छामि योग्ये जने
त्वत्तुल्यान् विनिवर्त्तयामि च परान्, प्रीणामि च प्रेयसः॥२६

सुबाहुः। रे रे मनुष्यापसद! कुत्सितप्रवृत्ते! धूर्त्ताभिसन्धान! साम्प्रतं न क्षणमपि सक्षमः सोढ़ुं। तत् पश्य—

निपातयतु ते शिरः शशधरप्रभः सायकः
छिनत्तु परिखण्डशस्तनुमसौ कृपाणः पुनः।
शृगालखगकुक्कुराः प्रमुदिताश्च कर्षन्त्वमी
रुदन्तु तव बन्धवः क्षितिलुठच्छरीराः शुचः॥२७॥

वीर। आः पाप! दुरात्मन्!।

सुबाहुः। आः पाप! दुरात्मन्!।

इति विकटं परिक्रम्य निष्क्रान्तौ।

नेपथ्ये।

रे रे पलायनपरो भव दानव! स्व-
मन्त्र: खलोऽपि लभतामित एव शिक्षाम्।
धर्म्म: स्थिरश्चरतु, नश्यतु पातकञ्च
राजन्वति स्फुरति नो विषमोऽत्र देशे ॥२८॥

तत: प्रविशति किरीटमादाय वीरसिंह:।

वीर। सावष्टम्भं परिक्रम्य। धिक् दानवापसदं, यदयं दुरात्मा पुन:पुनर्विजितोऽपि न निवर्त्तते पापात्। अहोवत! दुर्निवारो हि दुरात्मनामुद्यम:, येन हि कदर्य्यो जन: धर्म्माद्वा, अधर्म्माद्वा, समाजपरिवादाद्वा, परलोकाद्वा, मरणाद्वा न बिभेति।

तथाच—

दृष्ट्वा काञ्चित् रहसि रमणीं प्रागदिष्टचरस्तदन्ति
तस्यासिद्धौ, खनति वदति स्वं यथेच्छेत साऽपि।
चेष्टा सा चेन्न फलति तदा जीवनाशां जहाति
योगिप्रायाऽप्रतिहतगतिर्दुर्ज्जनस्याऽपि वृत्ति: ॥२९॥

अतएव—

समस्त: साधीयान् विनयतु परस्त्रीचटुलकं
स्वधर्म्मश्रद्धावान् परपुरुषलुब्धां स्त्रियमपि।
विमार्गप्रस्थायिन्यसति हि जने का खलु दया?
परागिष्टाशङ्की दहति विषवृक्षाङ्कुरमपि ॥३०॥

भवतु पश्यामि का खलु दशा सरोजिन्या इति । विलोक्य । अहो ! दुरात्मनो दानवाधमस्य निमीलितनयनाया नेदानीमपि स्वास्थ्यमापन्नमन्तःकरणम् । उपसृत्य । भद्रे ! समाश्वसिहि । निर्वर्ण्य साश्चर्यम् । कथमियं परिलुप्तचैतन्या निश्वासानुमेयजीवना संवृत्ता । आः ! कदर्य्यस्य खल्वियमरुन्तुदा क्रिया । येन—

समीरस्वानमात्रेण हरिणी चकितान्तरा ।
सहसा किं महारण्ये सहते सिंहगर्ज्जितम् ? ॥२१॥

भवतु, एवं तावत् । इति अलसेकं नाटयति ।

वरो । नयनयुगमुन्मील्य सेनापतिमवलोक्य पुनर्मुद्रयति ।

वीर । विलोक्य । हन्त ! नेदानीमपि हृदयमस्याः सुस्थीभूतम् । भवतु, प्रमोदवनिकायामेवैनामवस्थापयामि । विचिन्त्य । अहो ! विचित्रं खलु विधेर्विलसितं । येन—

अनुपमजनलिप्सुर्दानवो विप्रलब्धः
मम तु निखिलमङ्गं सङ्गरे शस्त्रखिन्नम् ।
अनभिलषितरत्नं विन्दते किन्तु राजा
विधिकृति निरपेक्षं को नु भाग्यं रुणद्धि ? ॥२२॥

इति सरोजिनीमुत्तानशयामङ्के समारोप्य निष्क्रान्तः ।

तृतीयोऽङ्कः ।

चतुर्थोऽङ्कः ।

—०—

नेपथ्ये ।

भो भोः पौरजानपदाः ! किमिति निरातङ्का विश्राम्यन्ति भवन्तः ? येन हि तत्रभवान् मालवेन्द्रः—

विहाय मणिकुण्डलप्रभृति राजचिह्नं,-दधत्—
मनोज्ञमनलङ्कृतं सरसकाव्यतुल्यं वपुः ।
प्रभावपरिलक्षितः प्रियतमागुणं वर्णयन्
पुरात् किल विनिर्गतो मलिनमत्तवेशोऽभवत् ॥१॥

तदिदानीमापामराः परितस्तमन्विष्यन्तु भवन्तः ।

॥ चूलिका ॥

ततः प्रविशति रज्जुं कर्त्तरिकाञ्च आदाय हालिकद्वयं ।

एकः । सानन्दं । अइले देवलाआ ! हग्गे एत्थ वच्छले लच्छीणाहे सम्बुत्ते । (क)

द्वितीयः । अले मङ्गलआ ! केलिशं ? । (ख)

मङ्ग । जेण एत्थ वच्छले मए तिक्खिसदए धम्मालए लद्धे, दुवे

(क) अरे देवराज ! अहम् अत्र वत्सरे लक्ष्मीनाथः संवृत्तः ।
(ख) अरे मङ्गलक ! कीदृशम् ?

तिलद्दोणेअ । ता दाणिं जइए देमासकदम्बए णेदुं पालेमि, तदो महालाएण तुल्ले होमि । (ग)

देव । मङ्गलआ ! मह क्खु मन्दभाअदाए पलिणए धण्णविन्दे सूअलेहिं दड्ढलालेहिं मूसिएहिं वि खाइदे,-णडवा हग्गे वि लच्छीणाहे होमि । (घ)

मङ्ग । अले पमत्ता ! तुमं घले सुविअ केवलं णिद्देसि, ता सूअलस्स मूसिअस्स वा को अवलाहो ? । (ङ)

देव । हग्गे किं कलेमि ? आचालिएण दिणं पेक्खिअ धण्णाइं लोविदाइं, तहवि णट्टाइं । (च)

मङ्ग । होदु, कज्जं कलेमि । (छ)

इति कर्त्तरिकया तृणं छिनत्ति ।

ततः प्रविशति साधारणवेशेन मत्तप्रायो राजा ।

राजा । समन्तादवलोक्य नेत्रे निमील्य च । हन्त ! न जाने कीदृशो

(ग) येन अत्र वत्सरे मया विंशतकं धान्याढकं लब्धं, द्वे तिलद्रोणे च, तदिदानीं यदि एतत् माषकदम्बकं नेतुं पारयामि, तदा महाराजेन तुल्यो भवामि ।

(घ) मङ्गलक ! मम खलु मन्दभाग्यतया परिणतं धान्यवृन्दं शूकरैः दग्धललाटैः मूषिकैरपि खादितं नतुवा अहमपि लक्ष्मीनाथो भवामि ।

(ङ)। अरे प्रमत्त ! त्वं गृहे शयित्वा केवलं निद्रासि, तत् शूकरस्य मूषिकस्य वा कः अपराधः ? ।

(च) अहं किं करोमि ? आचार्य्येण दिनं प्रेक्ष्य धान्यानि रोपितानि तथापि नष्टानि ।

(छ)। भवतु, कार्य्यं करोमि ।

खलु दैवविडम्बना ? येन नयनपथं गतापि स्वप्नायिता। अहो ! किमीदृशं मम भाग्यमस्ति ? येन—

विशालचललोचना मृदुलकुन्ददन्तावलिः
लसत्कुटिलकुन्तला स्मितसितीकृतोष्ठाधरा।
अपूर्व्वतनुचारुता ललितकोकिलालापिका
दृशं स्थलसरोजिनी किमुत सा पुनर्यास्यति ? ॥२॥

एष एव मे संशयविषयः, यत् सा किं स्थलसरोजिनी, अथवा जलसरोजिनीति ? भवतु, स्थलसरोजिनीत्येव निर्णेतव्यम्। तथाच—

सलिलान्तःसमुत्पन्ना सा चेज्जलसरोजिनी।
तदा कथं सदा लुब्धे सततं परुषान्तरा ॥ ३ ॥

सा खलु या काचिद्भवतु, किन्तु—

नयनविषयं प्रिया मे पुनरपि यास्यतीति चित्तं जागर्त्ति।
व्यतिस इव प्रत्ययमात्रं सोपसर्गं प्रकृतिशून्यश्च ॥४॥

विचिन्त्य। अयि हृदय ! नयनमेव सरोजिनीमिदानीं नावलोकते, त्वन्तु सततमेव तामनुभवसि, तत् किमिति विषीदसि ?। हे असन्तोषनयन ! समासन्नां खलु तामिकामिव पश्यसि, भुवनमिदानीं सरोजिनीमयमवलोकमानमपि कथमीदृशं विफलमश्रूणि विसृजसि ?। अयि सतृष्णकर्ण ! किमिति भवान् निरुपमं सरोजिनीस्वरमेव शृणोति ? येन कोकिलालाप-

मप्यवमन्यते । अहोवत ! सरोजिनीभुवनमयीति कथामात्रं, येन हि प्रत्यक्षदृष्टेव मामाप्याययति नेदानीम् । परितः पश्यन् कालिकद्वयमवलोक्य । अहो ! अस्मिन् खलु जेत्रे काविमौ ?

मलिनवसनखण्डेनावृतोरुः प्रजल्पन्
असिततनुशरीरः कर्त्तरीपाणिरेकः ।
रचयति तृणगुच्छं रज्जुमास्तीर्य्य भूमौ
किमपि च वदतेऽन्यः सम्भिवं स्तम्भकूटम् ॥५॥

विहस्य । अहो ! रूपान्तरपरिग्रहेण मां प्रतारयितुम् अत्रागताभ्यां सरोजिनीचित्रलेखाभ्यां भवितव्यं । विचित्रमेतत्—

ललनाच्छलनापरायणा
चपला वाऽप्यचला भवेद्यदि ।
कमलं समलं दिवातने
नियमं कं विदधौ विधिस्तदा ? ॥ ६ ॥

भवतु, पृच्छामि तावत् । उपसृत्य । प्रियतमे ! सरोजिनि ! किमियमौचिती भवत्याः ? यत्प्रसादपात्रे विषादप्रदानम् ।

कालिकौ । सविस्मयं विशेषेण निर्वर्णयतः ।

राजा । विहस्य । अयमपि युवयोरितरः प्रतारणोपायः ।

मञ्ज । जनान्तिकं । देवलाश्रा । के एवे अम्हेहिं अदिट्ठउव्वे किञ्चि पमत्ते विश्र अप्पेदि ? किन्तु सर्लं लप्पह्नाव

सूहद सोहग्गे पि दीसदि, ता पुच्छेमि । प्रकाशं । के तुमं ? (ज)

राजा । सस्मितं । अये ! न जाने, कति सन्ति युष्माकं किल मम वञ्चनोपायाः ! भवतु, अवधीयतां तावत्, अहं किल—

सरोजिनीप्रेमपरायणो जनः
सरोजिनीतीक्ष्णवियोगविह्वलः ।
सरोजिनीं सम्मृगयन् समन्ततः
सरोजिनीं तां भवतीमिहाप्तवान् ॥ ७ ॥

देव । जनान्तिकं । मङ्गलआ ! एसे क्खु णट्ठमणिए उलए विअ उक्कुए लक्खीअदि । प्रकाशं । अले ! का उण सलोइणी ? । (झ)

राजा । सखेदं । सखि ! चित्रलेखे ! त्वमपि मां शरणैषिणं विरमसि न विप्रलब्धुम् ? । अयि ! युष्माकं तरुणीजातिः खलु—

नेत्रकोणनिपातनमात्रतः
युवजनस्य न कां कुरुते दशाम् ? ।

(ज) देवराज ! क एषः अस्माभिरदृष्टपूर्व्वः किमपि प्रमत्त इव जल्पति ? किन्तु शरीरप्रभावसूचितसौभाग्योऽपि, दृश्यते, तत् पृच्छामि कस्त्वम् ? ।

(झ) मङ्गलक ! एष खलु नष्टमणिकः उरग इव उत्सुको लक्ष्यते । अरे ! का पुनः सरोजिनी ? ।

हृदि रतिं विरतिं विषयान्तरे
दृशि जलं विकलञ्च परं मनः ॥ ८ ॥

देव। का तुह सलोइणी होदि ? । (ञ)

राजा। अये ! किं पृच्छसि ? सरोजिनी किल मे हृदयमरु-मण्डले पीयूषवर्षधारा, विषादतिमिरे शशाङ्ककान्तिः, मदन-मध्यन्दिनदिनकरातपे विलाससरसी। अथवा अलमन्येन, सैव मे जीवनमिति ।

देव। अध तुमं से पणई ? । (ट)

राजा। तदिमामेव पृच्छ ।

मङ्ग। अपवार्य्य सकौतुकं। देवलाआ ! सच्चं ज्जेव एसे पमत्ते, ता इमिणा हग्गे कोलिस्सं । (ठ)

देव। अपवार्य्य। अले असदम ! आकिदी से मं कधेदि, ण एसे पाइदे मणुस्से, ता ण एसे कोलणए । (ड)

मङ्ग। अपवार्य्य। अच्चलीअं ? तुमं किं लम्माचलिए विश्च

(ञ) का तव सरोजिनी भवति ? ।

(ट) अथ त्वमस्याः प्रणयी ? ।

(ठ) देवराज ! सत्यमेव एष प्रमत्तः, तदनेन अहं क्रीडिष्यामि ।

(ड) अरे असत्तम ! आकृतिरस्य मां कथयति, नैष प्राकृतो मनुष्यः, तत् न एष क्रीडनकम् ।

जोइसे पण्डिदेसि ? जेण आइदिं पेक्खिअ जेव सव्वं बुज्झसि। (ढ)

देव। अपवार्य्य। मङ्गलआ! मङ्गलआ! तुमं मं विप्पलह, किन्तु आइदिप्पहावं दाव गणेहि। (ण)

मङ्ग। अले! तुमं जड्डमुहे हुविअ केवलं धम्मं गणेहि। राजानं प्रति। मह सलोइणीत्तणे किं पमाणं ?। (त)

राजा। अस्मिन् किल ते शरीरे तस्याः कुन्तलकलाप-सावर्ण्यमेव प्रमाणं। इति सविशेषं निरीक्षते।

मङ्ग। सस्मितं। पिअ! किं एत्थ मए कलणिज्जं ?। (थ)

राजा। अश्रूणि प्रमृज्य। अयि मदेकशरण्ये! सरोजिनि!

लघु रचय निजां तां चन्द्रवक्त्राख्यकान्तिं।

मङ्ग। केलिशीं ? (द)

राजा। नहि तुलयितुमीशः, साद्वितीया हि मूर्त्तिः।

(ढ) आश्चर्य्यं! त्वं किं लग्नाचार्य्य इव ज्योतिषे पण्डितोऽसि, येन आकृतिं प्रेक्ष्यैव सर्व्वं बुध्यसे।

(ण) मङ्गलक! मङ्गलक! त्वं मां विप्रलभस्व, किन्तु आकृतिप्रभावं तावत् गणय।

(त) अरे! त्वं जड्डमुखो भूत्वा केवलं धर्म्मं गणय। मम सरोजिनीत्वे किं प्रमाणम्।

(थ) प्रिय! किमत्र मया करणीयम् ?।

(द) कीदृशीम् ?।

मङ्ग। कहिं ब्बि णत्थि सदिसत्तणे?। (ध)

राजा। अस्ति खल्वनेकेषु वस्तुषु—

शशिनि, हरिणनेत्रे, पक्वबिम्बे, कदम्बे।
विबधि, कादलदण्डे, स्वर्णवर्णे च किञ्चित् ॥८॥

मङ्ग। एव्वं जइ, तह पिअ! वह मह तिणगुच्छे (न)

दैव। अले विवण्णप्पाअ! अमूल्लमणि लदण घलिदमुउडप्पदे से सेहले मा अप्पेहि तिणगुच्छं। (प)

मङ्ग। अपवार्य्य। अले वुड्ढआ! तुमं आसण्णमिच्चू ता जुत्तं अजुत्तं अ चिन्तेहि। हग्गे क्खु वुज्झामि, जेण अप्पणो सुअले होदि कज्जे, तह कलणिज्जे। राजानं प्रति। वह पिअ वह तिणगुच्छं। (फ)

राजा। सहसा विहस्य। अहो! दशाविनिमयविधायि खलु दैवं, येन हि पुरा मे शशाङ्कमरीचिसञ्चारकाले—

मुकुटेन्दुकान्तमणिना स्नवता
स्नपितं यदास्त शिशिरेव शिरः।

(ध) कश्चिदपि नास्ति सदृशत्वम्?।

(न) एवं यदि, तदा प्रिय! वह मम तृणगुच्छम्।

(प) अरे विपन्नप्राय! अमूल्यमणिरत्नघटितमुकुटास्पदे अस्य शेखरे मा अर्पय तृणगुच्छं।

(फ) अरे वृद्ध! त्वम् आसन्नमृत्युः, तत् युक्तमयुक्तञ्च चिन्तय। अहन्तु बुध्ये, येन आत्मनः सुकरं भवति कार्य्यं, तथा करणीयं। वह प्रिय! वह तृणगुच्छं।

तदिदं तृणस्तवकसंवहनात्
वहतां विधौतमलमद्य जलम् ॥ १० ॥

विचिन्त्य। अथवा किमेष विषादः? वहामि च तृणगुच्छम् उद्वहामि च सरोजिनीम्। हस्तौ प्रसार्य्य। राजनन्दिनि! स्वेनैव पाणिपङ्कजेन शिरसि मे समारोपय।

देव। मा दाव, मा दाव। (व)

मङ्ग। भ्रूकुटिं विधाय। चिट्ठ तुमं। (भ)

इति तथा कर्त्तुमारभते।

नेपथ्ये।

अरे रे जाल्लआहम! दासीएपुत्ता! अच्चाहिदं अच्चाहिदं। (म)

मङ्ग। तृणगुच्छं विहाय साशङ्कं समन्तादवलोकते।

ततः प्रविशति लगुडमुद्यम्य विदूषकः।

विदू। सरोषं तर्जनीमुत्तोल्य। अरे दासीए पुत्तआ! जस्स क्खु मालवणाहस्स सेहरे आसीप्पसूणं वि अप्पिदुं भिसं आसङ्कदि इसिजणो, तस्स ज्जेव सेहरे तुमं जवसं अप्पेसि, ता चिट्ठ। (य)

इति परितो विलोक्य तत्रैव निश्चिनोति।

(व) मा तावत्, मा तावत्।

(भ) तिष्ठ त्वम्।

(म) अरे रे जाल्मकाधम! दास्याः पुत्र! अत्याहितम् अत्याहितम्।

(य) अरे दास्याः पुत्र! यस्य खलु मालवनाथस्य शेखरे आशीःप्रसूनमपि अर्पयितुं भृशमाशङ्कते ऋषिजनः, तस्यैव शेखरे त्वं यवसमर्पयसि? तत्तिष्ठ।

कालिकौ। सभयं विदूषकमवलोक्य किञ्चिदन्तरं गच्छतः।

राजा। सासूयमिव। ब्राह्मण! ब्राह्मण! कथमिमां लावण्य-लहरीनिधिं मम प्राणप्रतिनिधिमकस्मादधिक्षिपसि ?।

विदू। सविषादविस्मयमात्मगतं। अह्मो अच्चरीओ क्खु देव्वप्पहावो, जेण हि ज एसो मदिट्ठिरदाए सह्स्सं सुविआरेदि, तस्स ज्जेव मदिब्भमो सम्बुत्तो। (र)

पह्र दिवाअर किरणो सुत्तिआए रअदत्थाणे हेदू।
अइदिविसदिसे मम्महो सरोइणीत्थाणे एदस्स ॥११॥

भोदु। प्रकाशं। मालवणाह! अदिविसदिसो क्खु एसो ण सरोइणी, ता आअच्छ, दिट्ठउव्वां ज्जेव तां तुह अप्पेमि। (ल)

राजा। विहस्य सोत्कण्ठं। अये! भुवनं भ्रमता न खलु कदापि सा मयेदानीं दृष्टचरी; तत्त्वं दर्शयिष्यसीति उन्मत्त-प्रलापः। अथवा—

नियतस्य नियतेः शक्तिं त्वञ्चेत्तां दातुमर्हसि।
उत्सर्गोऽपि तदा कुर्य्यात् विशेषविधिबाधनम् ॥१२॥

(र) अहो आश्चर्य्यः खलु दैवप्रभावः, येन हि य एष मतिस्थिरतया सहस्रं सुविचारयति, तस्यैव मतिभ्रमः संवृत्तः।

प्रखरदिवाकरकिरणः शुक्तिकायां रजतस्थाने हेतुः।
अतिविसदृशे मन्मथः सरोजिनीस्थाने एतस्य ॥

(ल) भवतु। मालवनाथ! अति विसदृशः खल्वेषः न सरोजिनी, तदागच्छ, दृष्टपूर्व्वामेव तां तव अर्पयामि।

विदू। महाराअ! एदं तुए आदव्वं, जइ एसा तुह्मप्पणइणी तदो कहं मत्थए तिणपुञ्जदाणेन तुमं असुहावेदि? (व)

राजा। विशेषेण निर्व्वर्ण्य विहस्य च। नैषा नैषा, त्वं खलु तदा सरोजिनी, येन मे प्रियमाचरसि। इति सशब्दं हसति।

विदू। वअस्स! परिइदउव्वं मं किं सरोइणीं विअ पेक्खसि? (श)

राजा। सविशेषं विलोक्य सार्त्तं। हत विधे! जगदिदमशान्ति-मन्दिरीकृतमद्य भवता। यतः—

सत्ये हि विचलन्मनः सरसि मे तत्कामनारोहणे
ग्राहामीनसमाविले स्थितवधूमानानिलव्याकुले।
गन्धामोदिसरोजिनी विकसिता सम्बन्धमूला स्थिता
केनापि द्विजदन्तिना ननु चिरादुन्मूलिता साऽधुना ॥१२॥

अये! दर्शय कुत्र सरोजिनी?।

विदू। आअच्छ। (ष)

यवनिकोत्थापनं। तत उद्यानमध्ये वामपाणिनिहितमुखी सरोदना सरोजिनी समुपविष्टा प्रविशति।

विदू। पृष्ठतो राजानमवलम्ब्य। पेक्ख सरोइणीं। (स)

(व) महाराज! एतत्त्वया ज्ञातव्यं, यदि एषा तव प्रणयिनी, ततः कथं मस्तके तृणपुञ्जदानेन त्वाम् असुखयति?।

(श) वयस्य परिचितपूर्व्वं मां किं सरोजिनीमिव प्रेक्षसे?।

(ष) आगच्छ।

(स) प्रेक्षस्व सरोजिनीं।

राजा । विलोक्य विहस्य च । अये ! सत्यं खल्वियं सरोजिनी । तथाच—

द्वितय-चपलभृङ्ग-प्रान्त-सम्पीयमाना
सरल-मृदु-मृणाल-द्वन्द्वसंश्रीयमाणा ।
अनधिक-विकचाभ्यां सङ्गता कोरकाभ्यां
पतदुदकसरोजा, नाऽन्यरूपा स्थलेऽपि ॥१४॥

सविशेषं निर्व्वर्ण्य सकम्पं । अयि जन्मान्तरसखे ! किमद्य दर्शितं त्वया । भवदर्थमेव समधिगता मया महामयमहौषधिः । येन हि—

नेत्रान्तान्निपतत् करोति कुचयोर्नेत्राम्बुमुक्ताभ्रमं
पद्मे पद्ममिव स्थितं करतले वामे विवर्णं मुखम् ।
गूढ़ं नो विजनस्थले स्तनयुगं, निर्णीतपूर्व्वा द्युतिः
एषा सैव सरोजिनी निरुपमा, नात्यत्र मे संशयः ॥१५॥

अधीर इव । हे अमन्तसन्तापतारक ! ब्राह्मणवर ! अवलम्बस्व माम् । इति मूर्च्छति ।

सखी । विलोक्य । हन्त ! जस्स किदे एरिसो मे देव्वविड़म्बणा, सो ज्जेव एसो मणोरधसददुल्लहो हिअअगअण पूस्स-चन्दो समुदिदो । (ह)

(ह) हन्त ! यस्य कृते ईदृशी मे दैवविड़म्बना, स एवैष मनोरथशतदुर्लभः हृदयगगनपूर्णचन्द्रः समुदितः ।

इति मूर्च्छति ।

विदू। कहं अज्जवि एसा विवत्ती ? महाराअ ! समस्सस, कीस उण दाणिं व्वि विमणाअसि ?। गेह्ण चिरप्पणट्ठं रदणं। (च)

इति पटान्तं सञ्चालयति ।

राजा। संज्ञां लभते ।

विदू। सरोजिनीमुपेत्य। भोदि ! उत्थेहि, पहादा क्खु दे दुक्खरअणी ; ता किं ण णिअप्पआसअं हरिदस्सं पेक्खसि ?। (क)

इति पटान्तं सञ्चालयति ।

सरो। चैतन्यमुपैति ।

राजा विलोक्य अश्रूणि विमृज्य च। हन्त सखे ! चमत्कारिणी खलु दैवपरिवृत्तिः। येनाद्य—

कस्याञ्चिन्निशि चञ्चलेव चपला या दृष्टपूर्व्वा मया
निद्राचुम्बितचक्षुषोऽन्तरदधान्मायाविनी सा न चेत् ।
मोहो वा विगतः स मे यदि, तदा भाग्याच्चिरं लिप्सिता
सन्नष्टा वणिजेव नौरिव मया प्राप्ता पुनः सा प्रिया ॥१६॥

सरो। अम्मो ! अज्ज देव्वप्पसाददो समासादिदो मए

(च) कथम् अद्यापि एषा विपत्तिः ?। महाराज ! समाश्वसिहि केन पुनरिदानीमपि विमनायसे ?। गृहाण चिरप्रनष्टं रत्नम् ।

(क) भवति ! उत्तिष्ठ, प्रभाता खलु ते दुःखरजनी, तत् किं न निजप्रकाशकं हरिदश्वं प्रेक्षसे ?।

दढ़तिमिरे पूसचन्दो, किन्तु एत्थ णत्थि पिश्रापश्चो णिञ्चणिरा-
दङ्को जणश्रो श्रवञ्च वच्छला अम्मा वि । (ख)

राजा । विदूषकाङ्गानि निर्व्वर्णयति ।

विदू । सस्मितं । किस्स क्खु मह अङ्गेसुं किम्बि अहिण-
वत्तणं बट्टदि ? जेण तुमं अदिमेत्तं बिलोएसि । (ग)

राजा । न खलु, वयस्यतया निश्चय एव मे विशेषविलोकन-
प्रयोजनम्, अथवा किमनेन ? नहि शशधरादन्यत्र सम्भवति
अमृतदीधितिः । विदूषकहस्तमवलम्ब्य । अनुकूलवर्त्तिनि किल
दैवे किं नाम दुरवापमस्ति शरीरिणाम् । तदद्य—

प्राणप्रायां परमरमणीं त्वत्प्रदिष्टामिमाञ्च
मित्रञ्च त्वामतिहितकरं प्राप्नुवन् शान्तचेताः ।
विन्नद्वैद्यं तदनुमुदितामोषधिञ्चाभ्युपेत्य
सुस्थात्मानं सुकृतिनमहं कृष्णपूर्व्वं स्मरामि ॥१७॥

किन्तु तथापि ममान्तरमान्दोलयति महान् सन्देहः ;
यदियं समीरणदुःसञ्चरगन्धर्व्वराजपुरवर्त्तिनी कथमत्र
सम्प्राप्तेति ।

(ख) अम्भो ! (खेदसूचकमव्ययमिदं) दैवप्रसादतः समासादितो मया दृढ़-
तिमिरे पूर्णचन्द्रः, किन्तु अत्र नास्ति प्रियापत्यो नित्यनिरातङ्को जनकः, अपत्यवत्सला
अम्बापि ।

(ग) किन्नु खलु मम अङ्गेषु किमपि अभिनवत्वं वर्त्तते ? येन त्वम् अतिमात्रं
विलोकयसे ।

विदू। वअस्स! कहि म्बि एसो वुत्तन्तो तुमं अपरिगेह्नीअ ण चिट्ठिस्सदि। (घ)

प्रविश्य वीरसिंहः। जयति जयति देवः।

राजा। सेनापते! ब्रूहि तावत्।

अनार्य्यं नेहते कश्चित् राज्ये निर्ज्जितशत्रुणि।
अथवा पुरुषे मुक्ते कुतः प्रकृतिसंस्रवः ॥१८॥

वीर। देव! देवेन अनादिष्टपूर्व्वं स्वयं निष्पादितं कमपि व्यापारमावेदयितुमिहागतोऽस्मि।

राजा। कथमिव?।

वीर। देव! कदाचिन्मया राज्यस्य निःशेषितशत्रुतया विस्रब्धं काशीपुरीं पर्य्यटता ससखीजनां सरोजिनीं कामयमाने सुवाहुनामनि दानवे निर्ज्जिते प्रस्थिता सा स्वनगरम्।

राजा। जनान्तिकं। वयस्य! स्मरसि? कस्मिंश्चिदहनि मया समं भवानपि सरोजिनीं पश्यन् सहसा वीरसम्मर्द्दमवेच्य मम शरणमापन्न इति।

विदू। अधइं। (ङ)

राजा। विचित्रमेतत्, यदहं सेनापतिमपि न खलु तदानीं निरणैषम्।

(घ) वयस्य! कस्मिन्नपि एष वृत्तान्तस्त्वामपरिगृह्य न स्थास्यति।

(ङ) अथ किम्।

विदू। जनान्तिकं। तत्थ क्खु भवं अत्ताण म्बि सरोइणीं पड़िवस्रो, ता कीस उण सेणावइनिस्सओ ?। (च)

राजा। सेनापते ! ततः ?

वीर। देव। परञ्च।

एकाकिनीं क्वचिदिमां चकितां व्रजन्तीं
श्येनः शुकीमिव दनोस्तनयश्चकर्ष।
आनीतवानहमितो विविधैरुपायैः
देवार्थमर्णवसुधामिव चक्रपाणिः॥ १८॥

परञ्च भगवता राजपुरोधसा मायासंहारिणा मन्त्रेण परिरक्षितेऽस्मिन् मण्डपे सुखमवस्थापिता च। श्रुत्वा देवः प्रमाणम्।

राजा। वीरसिंह ! कृतमिदं वीरजनोचितं कर्म्म, तदिदं पारितोषिकं परिगृह्य विश्रम्यताम्।

इति हारं ददाति।

वीर। हारं गृहीत्वा। यदाज्ञापयति देवः।

निष्क्रान्तः।

ततः प्रविशति चित्रलेखा हेमप्रभा च गायन्ती।

हे सखि ! नः सा वासना विधिपूरिता
प्राणसखी सरोजिनी मित्रमीलिता।

(च) तत्र खलु भवान् आत्मानमपि सरोजिनीं प्रतिपन्नः, तत् केन पुनः सेनापतिनिर्णयः ?।

नास्त्यसुखं नः, उभ्रसुखं वः,

चूतगले चारुलता चारु राजिता।

कान्ता कान्ते अतिकान्ते साधु शोभिता॥

राजा। (सोल्लासं) स्वागतमत्रभवत्योः ?।

चित्र। ण क्खु। (छ)

राजा। कथमिदं ?।

चित्र। जेन आअणादो अहिसप्पआरा पिअसही सरोइणी अज्ज पहुदि ट्ठाणान्तरिदात्ति। (ज)

राजा। सखि! किमुत ननु शशाङ्कः कुमुदाकरवर्त्तिनीं कुमुदिनीसंहतिं विच्छिद्य विकासयति ?।

विदू। स्मितं करोति।

चित्र। मुखमवनमय्य सासूयमिव। णिउत्तिरहिदा क्खु आसा सव्वस्स। (झ)

सरो। चित्रलेखां हेमप्रभाञ्च विलोक्य सम्भ्रान्ता मुखमवनयति।

हेम। बहिणि! चित्तलेहे! कधं अज्ज सरोइणी अह्मे अणासिलिसिअ ओणदमुही सम्बुत्ता ?। (ञ)

(छ) न खलु।

(ज) येन आननात् अभिन्नप्रचारा प्रियसखी सरोजिनी अद्य प्रभृति स्थानान्तरितेति।

(झ) निवृत्तिरहिता खलु आशा सर्वस्य।

(ञ) भगिनि! चित्रलेखे! कथमद्य सरोजिनी आवाम् अनाश्लिष्य अवनतमुखी संवृत्ता ?।

चित्र। अज्ज पहुदि सरोइणीए इत्थिआसिलेसणं परिच्चत्तं। (ट)

सरो। सहीओ! आअदे, अवि सुमरध मं? (ठ)

इति साश्रुनयना उभे परिष्वजते।

चित्र। ता सच्चं। (ड)

सरो। सुहं तुह्माणं, कुसलिणी मे अम्बा तादो अ। (ढ)

चित्र। अधइं। (ण)

सरो। हला सहि! कधेहि दाव मह वुत्तन्तं सुणिअ तादेण किं अज्झवसिदं?। (त)

चित्र। सरोइणि! सुणु दाव, तादो मह णिअडए तुह वुत्तन्तं सुणिअ। (थ)

सरो। साशङ्कं। सहि! किं तुए मह एसो वुत्तन्तो जधाजधं ज्जेव तादस्स णिवेदिदो? (द)

(ट) अद्य प्रभृति सरोजिन्या स्त्रीश्लेषणं परित्यक्तम्।

(ठ) सख्यौ? आगते? अपि स्मरथो माम्?।

(ड) तत् सत्यम्।

(ढ) शुभं युष्माकं, कुशलिनी मे अम्बा, तातश्च?।

(ण) अथ किम्।

(त) हला सखि! कथय तावत् मम वृत्तान्तं श्रुत्वा तातेन किम् अध्यवसितम्?

(थ) सरोजिनि! शृणु तावत्, तातो मम निकटे तव वृत्तान्तं श्रुत्वा।

(द) सखि! किं त्वया ममैष वृत्तान्तः यथायथमेव तातस्य निवेदितः?।

चित्र। हला ! किस्सु मं जुहिट्ठिरमदिं विअ णिच्च सच्चपरदन्तां जाणासि ? जेण एव्वं सङ्कसि। एव्वं क्खु सासुसुमुहीए मए विसविदं तादस्स, जह कहिं म्बि एअलिआ सरोइणी णिहुदं कासीणअरे सिवं बन्दमाणा सुबाहुणा दानवेण आक्कन्दा रणणिउणेन मालवणाधेण अदाणवम् अवाकरीअ अत्तणअरं पाविदा चिट्ठदित्ति। (ध)

सरो। सानन्दं। अज्ज धस्साह्मि, जेण तुए ओसारिदो दढ़ो कलङ्को। (न)

हेम। सगर्व्वं। एत्थ उवत्थिदिकाले कधं एसा सम्भाविणो से कलङ्कस्स चिन्ता णासी ? (प)

सरो। सलज्जमधोमुखी तिष्ठति।

चित्र। बालिए एदं तुए कधं जाणिदव्वं ?। (फ)

सरो। सहि ! तदो तादेण किं अज्झवसितं ?। (ब)

चित्र। तदो तिस्सिमासिअ पुरच्चरणप्पउत्तेण तादेण दिट्ठिआ वञ्चअणिरासिणो गडुन्दस्स विअ णालिणी, मालवणाधस्स

(ध) हला ! किन्नु मां युधिष्ठिरमतिमिव नित्यसत्यपरतन्त्रां जानासि ? येन एवं शङ्कसे। एवं खलु साश्रुमुख्या मया निवेदितं तातस्य, यथा कस्मिन्नपि एकलिका सरोजिनी निभृतं काशीनगरे शिवं वन्दमाना सुबाहुना दानवेन आक्रान्ता रणनिपुणेन मालवनाथेन च दानवं अपाकृत्य आत्मनगरं प्रापिता तिष्ठतीति।

(न) अद्य धन्यास्मि, येन त्वया अपसारितो दृढ़ः कलङ्कः।

(प) अत्र उपस्थितिकाले कथमेषा सम्भाविनः अस्य कलङ्कस्य चिन्ता नासीत्।

(फ) बालिके ! एतत् त्वया कथं ज्ञातव्यम् ?

(ब) सखि ! ततस्तातेन किम् अध्यवसितम् ?।

दाणवजइणो हत्थे सरोइणी निपड़िदा, तदो को ईदिसं सलाहणीज्जसम्बन्धं उज्झदित्ति भणिअ तुमं अप्पिदुं पड़िणिहीकदुअ पुरोहिदो पेसिदो । (भ)

मरी । सखेदमिव । सहि ! सच्चं ज्जेव तादस्स मं पड़ि णत्थि सिणेहो, जेण एव्वं अणादजणस्स मं अप्पेदि । (म)

चित्र । सगर्व्वहासं । अम्महे ! परिच्चअ विसादं, जाणामि तुह मणोरधं । इदो असहणीज्जो विलम्बो, तहवि ण सोहदि सालीणत्तणं । अरे ! जालुअणिड़ए मच्छगुत्तिः ? । (य)

ततः प्रविशति पुरोहितः ।

सर्व्वाः । अवलोक्य किञ्चिदिव सम्भ्रान्ताः ।

पुरो । हस्तमुद्यम्य । विजयतां मालवेन्द्रः ।

राजा । उत्थाय । अभिवादये भवन्तम् । इदमास्तीर्णमासनम्, उपविश्यताम् ।

पुरो । उपविश्य । राजन् !

आस्तां स्वस्ति समस्तराज्यविभवे, चर्च्चा हरस्यार्च्चने
ज्योतिष्मान् भव भानुमानिव जहन्मायां तमिस्रामिव ।

(भ) ततस्त्रिमासिकपुरश्चरणप्रवृत्तेन तातेन दिष्ट्या वञ्चकनिरासिनो गजेन्द्रस्येव नलिनी, मालवनाथस्य दानवजयिनो हस्ते सरोजिनी निपतिता, ततः क ईदृशं श्लाघनीयसम्बन्धम् उज्झतीति भणित्वा त्वामर्पयितुं प्रतिनिधीकृत्य पुरोहितः प्रेषितः ? ।

(म) सखि ! सत्यमेव तातस्य मां प्रति नास्ति स्नेहः, येन एवम् अज्ञातजनस्य माम् अर्पयति ।

(य) अम्महे ! परित्यज विषादं, जानामि तव मनोरथम् । इतः असहनीयः विलम्बः, तथापि न शोभते शालीनत्वम् । अरे ! जालुकनिकटे मत्स्यगुप्तिः ? ।

बन्धं सांख्यविदां विदीर्य्य तरतादृयोगं प्रकृत्यात्मनो:
अङ्गानि स्ववशीभवन्तु भवतो राज्यस्य योगस्य च ॥ २० ॥

राजा। भगवन्!

धर्म्मार्थकाममोक्षाणां चतुर्णामिह कारणम्।
अविद्येवाश्रितादीनामाशीरेषा भवादृशाम् ॥२१॥

पुरो। राजन्! तत्रभवता गन्धर्वपतिना पूर्वसङ्कल्पितायाः सरोजिन्याः परित्राणप्रवृत्तिमधिगम्य प्रतिनिधीकृतः प्रेषित-श्वास्मि तस्याः प्रदानेन भवन्तमानन्दयितुम्। तदिदानीं भव-दभिप्राय एव प्रमाणम्।

राजा। भगवन्! सूर्य्यस्य पूर्वाचलोपस्थितिरिव भवादृशा-मागतिरेवाभ्युदयाय लोकानां; तदितः कीदृगानन्दः सम्भा-व्यते?।

विदू। सासूयं जनान्तिकम्। वअस्स! एसोवि ब्बह्मणो अह्व वि ब्बह्मणो, ता इमस्स तुए जह आदरो करीअदि मह जीवणे वि ण तादिसो किदो। (२)

राजा। सस्मितमपवार्य्य। वयस्य! किमेवं विमनायसे? शृणु तावत्—

आवयोरुभयोरेव लिप्सास्ति न तु मेलनम्।
सति हेतौ फलाभावे विशेषोक्तिर्हि युज्यते ॥२२॥

---

(२) वयस्य! एषोऽपि ब्राह्मणः अहमपि ब्राह्मणः तदस्य त्वया यथा आदरः क्रियते, मम जीवनेऽपि न तादृशः कृतः।

विदू। तहिं भण अमिए कस्स अरुइ त्ति। (ल)

पुरो। मालवेन्द्र! नियतमेव परिस्फुरति भवतामीदृशं सूनृतं वचः, किन्तु गन्धर्वराजप्रार्थनायां किमवोत्तरं भवतः ?।

राजा। विनयेन पृच्छामि न प्रत्याख्यानेन; मह्यमात्मजामर्पयतो गन्धर्वराजस्य कः खलु सन्तोषविशेषः ?।

पुरो। विहस्य। राजन्!

कन्या वरेषु कुलशीलगुणान्वितेषु
तीव्रातपेषु सवितुः शिशिरानिलश्च।
विद्या सुतेषु रजनीषु च पौर्णमासी
क्षेत्रेषु शस्यमपि कस्य न तोषकाणि ?॥ २३॥

राजा। स्वगतम्। अहो!

स्थाने स्थाने विचलितमतिः प्रस्खलन् नाम जल्पन्
या मन्वेषं स्वयमुपगतस्तामसौ दातुमिच्छन्।
आह्लयार्थं स्वयमभिमतं दत्तवान् निर्धनाय
लोकानां स्यात् सति सुसमये सर्वमाशानुरूपम् ॥२४॥

भवतु। प्रकाशम्। भगवन्! अनुरुणद्धि भवान्, आदिशति च गन्धर्वराजः, तदिदमवश्यमङ्गीकर्त्तव्यम् ?

पुरो। सहर्षम्। साधु, मालवेन्द्र! परमनुगृहीताः स्मः। येन—

इन्दोः सान्द्रा चन्द्रिकेवाङ्कलग्ना
छायाऽनुष्णा वीणारश्मेः सहाया।

(ल) तर्हि भण, अमृते कस्य अरुचिरिति।

आस्तामङ्के सङ्गिनीयं चिरं ते
नास्त्येतस्माच्छान्तिरैकान्तिकी नः ॥२५॥

अयि वत्से ! चित्रलेखे ! हेमप्रभे ! नन्विदानीं युष्माभिर्मङ्गलविधानपराभिर्भवितव्यम् । यतः—

आमोदरससम्पूर्णा प्रफुल्लमुखपङ्कजा ।
हरिदश्वकरस्पर्शात् विराजत सरोजिनी ॥२६॥

सरो । सलज्जमधोमुखी तिष्ठति ।

चित्रलेखा हेमप्रभा च । सहर्षम् । भअवं ! एसो अह्माणं चिरन्तणो मणोरधो । (व) इति गायति ।

चित्र । नवीनसरसि सरोजिनी मृदुलपवनविकम्पिनी ।
मुग्धतरे ! गायतु रे ! । कथा ।

हेम । सकलकलासु विकासिनी नागरहृदयविहारिणी ।
भासितास्मि हर्षनीरे । कथा ।

चित्र । प्रभात उदितो दिनमणिः समीपविहारी रतिजानिः ।
वामदिशि याहि सखि ! कथा ।

हेम । भविता चिरं तदामोदिनी चिरस्थानन्तरवियोगिनी !
किं स्थितासि नम्रमुखी ? ! कथा ।

चित्र । मुक्तया मीलितो गजमणिः मनोज्ञतरुणसहायिना ।
जातमद्य शान्तिदिनम् । कथा ।

हेम । वासनाफलिता चिरन्तनी सुखिनी चिराय सीमन्तिनी ।
तुल्यमिह पुरं वनम् । कथा ।

(व) भगवन् ! एषाऽस्माकं चिरन्तनी मनोरथः ।

पुरो । राजन् ! किमतःपरं भवद्भिरीप्सितमस्ति ? ।

राजा । भगवन् ! यद्यपीयमेव नः परिसीमा प्रियकार्य्यस्य, तथापीदमर्थयामः । यत्—

भरतवाक्यम् ।

लोकाः सन्तु निरीतयो, बुधगणो विद्योततां विद्यया
भूयासुः सुखसम्पदश्च, विपदो नश्यन्तु नित्यं सताम् ।
श्रीगोविन्दपदारविन्दयुगले सङ्कल्पितो यश्चिरं
न्याय्योऽसौ कुसुमाञ्जलिः पततु मे माभूच्च जन्मान्तरम् ॥२७॥

कोटालिपाड़नगरोनशियानिवासी
सत्काश्यपः सुकविलभ्ययशोऽभिलाषी ।
शाके धराऽब्धि वसुचन्द्रमिते सुकर्म्मा
श्रीमानिमां रचितवान् हरिदासशर्म्मा ॥ २८ ॥

इति निष्क्रान्ताः सर्वे ।

यवनिकापतनम् ।

समाप्तेयं विराजसरोजिनी
नाटिका ।

বিজ্ঞাপন।

শ্রীযুক্ত হরিদাস সিদ্ধান্তবাগীশ মহাশয় বিরচিত নিম্নলিখিত পুস্তকগুলি বিক্রয়ার্থ প্রস্তুত :—

১। বিরাজসরোজিনী (নাটিকা)। মূল্য ॥০ আট আনা।

২। স্মৃতিচিন্তামণি (যন্ত্রস্থ)। মূল্য ১।০ এক টাকা চারি আনা

সম্পূর্ণ নূতন ধরণের পুস্তক। ইহাতে স্মার্ত্ত-ভট্টাচার্য্যের তিথি, উদ্বাহ, প্রায়শ্চিত্ত, শুদ্ধি, শ্রাদ্ধ ও মলমাসতত্ত্বের এবং চন্দনধেনুবিবেক ও দত্তকচন্দ্রিকার সকল ব্যবস্থা প্রমাণ প্রয়োগসমেত উদ্ধৃত করা হইয়াছে, তদ্ভিন্ন জগদ্ধাত্রী, দীপান্বিতা, রটন্তী, সৌভাগ্য-লক্ষ্মীপূজা, গর্ভিণীকৃত্য প্রভৃতি বহুতর আবশ্যকীয় বিষয় লিখিত হইয়াছে। উপরে সরল সংস্কৃতভাষায় প্রমাণাদিসমেত মূল এবং নিম্নে বিশদ ও বিস্তৃত বঙ্গানুবাদ দেওয়া হইয়াছে। এ কথা সাহস করিয়া বলিতে পারি যে, ৩।৪ বৎসর পড়িয়া যে সকল ব্যবস্থা জানিতে হয়, স্মার্ত্ত-ভট্টাচার্য্য প্রভৃতির মীমাংসিত সেই সকল ব্যবস্থা প্রমাণাদিসমেত ১ মাসে অনায়াসে জানিতে পারা যাইবে, অতএব পণ্ডিত ও অপণ্ডিত সাধারণের পক্ষেই এই গ্রন্থ বিশেষ উপযোগী। বিশেষতঃ স্মৃতির গবর্ণমেণ্ট গৃহীত আদ্য, মধ্য ও উপাধি পরীক্ষার গত ৫ বৎসরের প্রশ্নপত্রসমূহ সন্নিবেশিত থাকায় স্মৃতিশাস্ত্রের পরীক্ষার্থিগণের বিশেষ আবশ্যকীয়। একসঙ্গে উক্ত দুখানা পুস্তক লইলে ১॥০ দেড় টাকা মূল্যে দিব।

উক্ত সিদ্ধান্তবাগীশ মহাশয় বিরচিত নিম্নলিখিত সংস্কৃত পুস্তকসমূহ ক্রমশঃ প্রকাশিত হইবে ঃ—

১। বিয়োগবৈভব (খণ্ডকাব্য)।

২। রুক্মিণীহরণ (মহাকাব্য)।

৩। সরলা (সরল সংস্কৃত গদ্যকাব্য)।

৪। সাঙ্খ্যপ্রকাশ (সাঙ্খ্য অনিরুদ্ধবৃত্তির সরল টীকা)।

প্রাপ্তি স্থান—

জেলা ফরিদপুর, পোষ্ট অফিস উনশিয়া, উনশিয়া গ্রামে গ্রন্থকারের বাটী শ্রীলক্ষ্মীকান্ত ভট্টাচার্য্যের নিকট। অথবা—

১। জেলা খুলনা, পোষ্ট নকীপুর, হরিচরণ-চতুষ্পাঠী, গ্রন্থকারের নিকট।

২। কলিকাতা বাগ্‌বাজার ৩৯ নং বসুপাড়া লেন শ্রীজানকীনাথ ভট্টাচার্য্যের নিকট।

৩। ২২ নং বলরাম ঘোষ ষ্ট্রীট শ্রীশ্রীরাম শাস্ত্রীর নিকট।

শ্রীলক্ষ্মীকান্ত ভট্টাচার্য্য।